MSS No. 207 Subject Religion

Name of MSS श्रीमद्भागवत (एक खंड)

Author – –

Period – – Folios 43

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios

श्रीमद्‌भागवत ८ स्कंध ;
अपूर्ण
असं० पत्रक ११ ल० ४०।२ पं०
प्र० पृ०

हे० ल०

207

१२

207

207

यस्य पालको नाम भविष्यति ॥२॥ प्रद्योतना: प्रद्योतसंज्ञाः ॥३॥ नंदो नाम कश्चिन् महापद्मसंख्यायाः सेनायाः धनस्य च
पतिर्भविष्यति ॥ अत एव महापद्म इति प्रथितस्य नंदस्यापरं नाम ॥८॥ एकमेवछ्लंघ्यं यस्यां तां पृथिवीं शासिष्यति पालयि।

श्रीशुक उ॰॥ योंऽत्यः पुरंजयो नाम भविष्यो बार्हद्रथः ॥ तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजे ॥१॥
प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः ॥२॥ विशाखयूपस्तत्पुत्रो भविता राजकस्ततः ॥ नंदिवर्धनस्त
त्सुतः पंच प्रद्योतना इमे ॥३॥ अष्टत्रिंशोत्तरशतं भोक्ष्यंति पृथिवीं नृपा ॥३॥ शिशुनागस्ततो भाव्यः का
कवर्णस्तु तत्सुतः ॥ क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः ॥४॥ विधिसारस्ततस्तस्याजातशत्रुर्भ
विष्यति ॥ दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ॥५॥ नंदिवर्धन आजेयो महानंदिः सुतस्ततः
शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयं ॥६॥ समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः ॥ महानंदिसुतो
राजन् शूद्रागर्भोद्भवो बली ॥७॥ महापद्मपतिः कश्चिन्नंदः क्षत्रविनाशकृत ॥ ततो नृपा भविष्यंति शूद्र
प्रायास्त्वधार्मिकाः ॥८॥ स एकच्छत्रां पृथिवीमनुल्लंघितशासनः ॥ शासिष्यति महापद्मो द्वितीय इ
व भार्गवः ॥९॥ तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः ॥ य इमां भोक्ष्यंति महीं राजानः स्म शतं स
माः ॥१०॥ नव नंदान् द्विजः कश्चित्प्रपन्नानुद्धरिष्यति ॥ तेषामभावे पृथिवीं मौर्या भोक्ष्यंति वै कलौ ॥११॥

ष्यति तत्रोत्साहने दृष्टांतः भार्गवः परशुराम इव ॥९॥ समाः संवत्सरान् ॥१०॥ नव नंदान् नंदं च तत्पुत्रांश्चाष्टौ एवं नव प्र
पन्नान् विश्वस्तान् विख्यातान् वा द्विजः कौटिल्यवात्स्यायनादिपर्यायः चाणिक्य उद्धरिष्यति उन्मूलयिष्यति ॥ मौ

भा॰ द्वा॰ स्कं॰ टी॰ ॥२॥ १॥

कथंभोदस्यंतितत्राह ॥ सएवेतिचंद्रगुप्तंमौर्यप्रथमं ॥२४॥ तेषांप्रथमोदशरथःपराशरादिभिरुक्तोपत्रुसंधेयः ॥ तेनस
हमौर्यादशसप्तत्रिंशच्छतोत्तरंसप्तत्रिंशदुत्तरंशतंसमाः ॥२४॥ हत्वद्रथस्यसेनापतिःपुष्पमित्रोनामस्वामिनंहत्वा
राज्यंकरिष्यति ॥२५॥ सचशुंगानांप्रथमःततोग्निमित्रादयोनव ॥ अस्येवंशुंगादशवर्षशताधिकंद्वादशाधिकंव

सएवचंद्रगुप्तंवैद्विजोराज्येभिषेक्ष्यति ॥ तत्सुतोवारिसारस्तुततस्त्वशोकवर्धनः ॥२२॥ सुयशाभ
विताततस्यसंगतःसुयशाःसुतः ॥ शालिशूकस्ततस्तस्यसोमशर्माभविष्यति ॥२३॥ शतधन्वाततः
तस्तस्यभविताबृहद्रथः ॥ मौर्याह्येतेदशनृपाःसप्तत्रिंशच्छतोत्तरं ॥२४॥ समाभोक्ष्यंतिपृथिवीं
कलौकुरुकुलोद्वह ॥२४॥ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठोभविताततः ॥ वसुमित्रोभद्रकश्चपुलिं
दोभविताततः ॥२५॥ ततोघोषःसुतस्तस्माद्वज्रमित्रोभविष्यति ॥ ततोभागवतस्तस्माद्देवभूतिः
कुरूद्वह ॥२६॥ शुंगादशैतेभोक्ष्यंतिभूमिंवर्षशताधिकं ॥२७॥ ततःकण्वानियंभूमिर्यास्यत्यल्पगु
णान्नृप ॥२७॥ शुंगंहत्वादेवभूतिंकण्वोमात्यस्तुकामिनं ॥ स्वयंकरिष्यतेराज्यंवसुदेवोमहा
मतिः ॥२८॥ तस्यपुत्रस्तुभूमित्रःतस्यनारायणःसुतः ॥ कण्वायनाइमेभूमिंचत्वारिंशच्चपंचच
शतानित्रीणिभोक्ष्यंतिवर्षाणांचकलौयुगे ॥२९॥ हत्वाकण्वंसुशर्माणंतद्भृत्योवृषलोबली
गांभोक्ष्यत्यंध्रजातीयःकंचित्कालमसत्तमः ॥ ॥२०॥ ॥ ॥ ॥ राम

षशतं ॥२७॥ कथंकण्वामात्यतितत्राह परस्त्रीकामिनंदेवभूतिनामानंशुंगंहत्वातदमात्योवसुदेवनामाक
ण्वोराज्यंकरिष्यति ॥२८॥ कण्वायनानांचतुर्णांसुशर्मांतमेचवासुदेवादयःकाण्वायनाःवर्षाणांत्रीणिशता
निपंचचत्वारिंशद्वर्षाणिचभूमिंभोक्ष्यंति ॥२९॥ कण्वानांअंत्यमसुशर्माणंहत्वाबलिहिकनामातद्भृत्योगां।

॥ ॥१॥

२

यत्रयेषुवर्षसंख्येषु ग्रहस्तनवमः शिवस्वातिर्नामाभविता ॥२४॥ आवभृत्याः प्रवृत्तिः नामनगरीतद्राजानः ॥२७॥ एते।
आभीराद्यो मौनव्यतिरिक्ताः पंचषष्टिनृपाः एकोनशताधिकं वर्षसहस्रं पृथिवीं भोक्ष्यंति ततः पूर्वोक्ता एव एका
दश मौनाः त्रीणि सहस्रशतानि त्रितिं भोक्ष्यंति तैरसंस्थितेषु मौनेषु भूतेषु किलिकिलायां नगर्यां नृपतयो भविष्यंती
ह्मसनामाथतत्पुत्रो भविता पृथिवीपतिः ॥ श्रीशातकर्णिस्तत्पुत्रः पौर्णमासस्ततस्ततः ॥२१॥ लंबो
दरस्ततत्पुत्रः तस्माच्चिविलको नृपः ॥ मेघस्वातिश्चिविलकाद्टमानस्ततस्ततः ॥२२॥ अरिष्टकर्मा
ह्नालेयः तलकस्तस्यचात्मजः ॥ पुरीषभीरुस्तत्पुत्रः ततोराजासुनंदनः ॥२३॥ चकरो वटकोयत्र
शिवस्वातिररिंदमः ॥ तस्यापि गोमतीपुत्रः पुरीमान्भविता ततः ॥२४॥ मेदशिराः शिवस्कंधो यज्ञ।
श्रीस्तस्ततस्ततः ॥ विजयस्तस्ततोभाव्यः चंद्रविज्ञः सलोमधिः ॥२५॥ एते त्रिंशन्नृपतयः चत्वार्य
चत्वार्यब्दशतानि च ॥ षट्पंचाशच्च पृथिवीं भोक्ष्यंति कुरुनंदन ॥२६॥ सप्ताभीराश्चावभृत्या दशगर्द
भिनोनृपाः ॥ कंकाः षोडशभूपाला भविष्यंति चलोलुपाः ॥२७॥ ततोष्टौ यवना भाव्याश्चतुर्दश तुरु
ष्ककाः ॥ भूयो दशगुरुंडाश्च मौनाएकादशैवतु ॥२८॥ एतेभोक्ष्यंति पृथिवीं दशवर्षशतानि च ॥ नवा
धिकां च नवतिं मौनाएकादशक्षितिं ॥२९॥ भोक्ष्यंत्यब्दशतान्यंगत्रीणि तैः संस्थिते ततः ॥ किलिकि
लायां नृपतयो भूतनंदोथ विंध्यशक्तिः ॥३०॥ शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः ॥ इत्येवं ते वर्षश
तं भविष्यंत्यधिकानि षट् ॥३०॥ तेषां त्रयोदशसुता भवितारश्च बाह्लिकाः ॥ पुष्पमित्रोथ राजन्यो दुर्मि।
त्रस्तरेणान्वयः ॥३१॥ अधिकानि च षट्पुर्णानि ॥३२॥ तेषां भूतनंदादीनां यथायथं बाह्लीकाः तन्नामानः त्रयोद
शाससुताभविष्यंति ॥ अथपुष्पमित्रोनामान्योराजन्यः ॥ अस्यचंडमित्रोनामपुत्रः ॥ ॥ ॥ ॥ ॥२२॥ ॥

तथांध्राःकौशलाःवैदूरपतयःविषधाश्चएतेतत्तद्देशनामभिःआख्याताःतुल्यकालाःएवंइमेकलेषुभूपाःततए
वतेभ्योबाह्लिकेभ्यएवभाव्याभविष्यंति॥३३॥ततश्चमागधानांतुराजाविश्वस्फूर्जिर्नामभवितासपूर्वोक्तात्पुरंज
यात्परःपुरंजयादतिप्रसिद्धःसन्वर्णान्ब्राह्मणादीन्पुलिंदयदुमद्रसंज्ञान्म्लेच्छप्रायान्करिष्यतिअपरानिति।
पाठेअन्यान्पुलिंदादिसंज्ञान्वर्णान्करिष्यतीत्यर्थः॥३४॥सएवंकृत्वाअब्रह्मभूयिष्ठाःनब्रह्मतत्त्वानंअथवाब्र

एककालाइमेभूपाःसप्तांध्राःसप्तकौशलाः।विदूरपतयोभाव्यानैषधास्ततएवहि॥३३॥मागधानांतुभ
विताविश्वस्फूर्जिःपुरंजयः।करिष्यत्यपरोवर्णान्पुलिंदयदुमद्रकान्॥३४॥प्रजाश्चाब्रह्मभूयिष्ठाःस्था
पयिष्यतिदुर्मतिः।वीर्यवान्क्षत्रमुत्साद्यपद्मावत्यांसवैपुरि॥३५॥अनुगंगमाप्रयागंगुप्तांभोक्ष्यतिमे
दिनीं॥सौराष्ट्रावंत्याभीराश्चशूराअर्बुदमालवाः।व्रात्याद्विजाभविष्यंतिशूद्रप्रायाजनाधिपाः॥३६॥
सिंधोस्तटंचंद्रभागांकौंतींकाश्मीरमंडलं।भोक्ष्यंतिशूद्राव्रात्याद्याम्लेच्छाश्चाब्रह्मवर्चसः॥३७॥
तुल्यकालइमेराजन्म्लेच्छप्रायाश्चभूभृतः।एतेधर्मानृतपराःफल्गुदास्तीव्रमन्यवः॥३८॥ ॥

ह्मवेदंवेदशास्त्रिनं॥अन्येत्वेवर्णप्रचुराःसतीःप्रजाःस्थापयिष्यतिपालयिष्यति॥सचपद्मावत्यांपुरिअनुगंगं
गंगाद्वारमारभ्यप्रयागपर्यंतंगुप्तांरक्षितांपालितांमेदिनींभोक्ष्यति॥३५॥ततश्चनंतरंचसौराष्ट्रादिदेशवर्तिनो।
द्विजाव्रात्याउपनयनरहिताभविष्यंतिअब्रह्मवर्चसःवेदाचारशून्याः॥३७॥इमेचम्लेच्छप्रायाभूभृतःतुल्यकाला
भविष्यंति॥किंचएतेसर्वेअधर्मानृतपराःअधर्मेअनृतेचपरिनिष्ठिताःफल्गुदाःअल्पदातारः॥३८॥ ॥

असंस्कृता गर्भाधानादिसंस्काररहिताः अतो भक्षयिष्यंति धनाद्यपहारादिना पीडयिष्यंति ॥ ३९ ॥ किंच तन्नाथाः ते
भूपाः तासां प्रजानां नाथाः तन्नाथाः ते नाथाः येषां ते जनपदाः देशवर्त्तिनो मनुष्याः तच्छीलाचारवादिनः तेषामे
व शीलमाचारो वादश्च तत्तुल्याः ॥ ४० ॥ द्वादशे प्रथमः ॥ १ ॥ द्वितीये तु कलेर्दोषवृद्धौ कल्क्यवतारतः ॥ अधर्मच्छेदनेनेष्टे

स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः ॥ उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः ॥ ३८ ॥ असंस्कृताः
क्रियाहीना रजसा तमसावृताः ॥ प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ॥ ४० ॥ उदितास्तमितप्राया
हर्षशोकादिविह्वलाः ॥ ४० ॥ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ॥ अन्योन्यतो राजभिश्च क्षयं
यास्यंति पीडिताः ॥ ४१ ॥ इति श्रीभागवते द्वादशस्कंधे वंशानुवर्णनं प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ ततश्चानुदि
नं धर्मः सत्यं शौचं क्षमा दया ॥ कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृतिः ॥ १ ॥ वित्तमेव कलौ नॄणां जन्माचा
रगुणोदयः धर्मन्यायव्यवस्थायां कारणं बलमेव हि ॥ २ ॥ दांपत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके
राम ॥ स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ॥ ३ ॥ ॥ ॥ राम

पुनः कृतयुगागमः कलिधर्मानुपंचयति तत इत्यादिना ॥ १ ॥ धर्मन्याययोर्व्यवस्थायां बलमेव हि ॥ २ ॥ दांपत्ये प
तिभावे अभिरुचिरेव हेतुः न कुलगोत्रादिभिः व्यावहारिके क्रयविक्रयादौ स्त्रीत्वे पुंस्त्वे च तयोः श्रेष्ठे रतिः कौशलमे

श्री॰ भा॰ द्वा॰ टी॰ ध

आश्रमाणां ख्यातौ ज्ञाने लिंगमेव दंडाजिनादिकं हेतुः न त्वाचारविशेषः अन्योन्यापत्तिकारणं च ॥ आश्रमादाश्रमांतर
प्राप्तौ च कारणं यद्वा वटुदंडकहंसादीनां अन्योन्यापत्तौ नमस्कारादिव्यवहारे कारणं अवृत्त्या सुवर्णादिदानासाम
र्थ्येन न्याये दौर्बल्यं पराजयः चापलं वचः बहुभाषणं ॥४॥ असाधुत्वे चार्थाय अभियोगे अल्पमेकाकी निस्वत्वमेव तस्य
सत्वे करोति साधुत्वे दंभ एव तु उद्वाहे विवाहे स्वीकारः न तु ज्ञानदृष्टिः स्नानमेव प्रसाधनमलंकारः न तु योगस्नानं ॥५

लिंगमेवाश्रमख्यातावन्योन्यापत्तिकारणं ॥ अवृत्त्या न्यायदौर्बल्यं पांडित्ये चापलं वचः ॥४॥ अनाढ्यतै
वासाधुत्वे साधुत्वे दंभ एव तु ॥ स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनं ॥५॥ दूरे वार्ययनं तीर्थं लावण्यं के
शधारणं ॥ उदरंभरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ॥६॥ दाक्ष्यं कुटुंबभरणं यशोर्थे धर्मसेवनं ॥ एवं प्रजा
भिर्दुष्टाभिराकीर्णे क्षितिमंडले ॥७॥ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ॥ प्रजा हि लुब्धै राजन्यै
र्निर्घृणैर्दस्युधर्मभिः ॥८॥ आच्छिन्नदारद्रविणा यास्यंति गिरिकाननं ॥ शाकमूलामिषक्षौद्रफलपुष्पा
ष्टिभोजनाः ॥९॥ अनावृष्ट्या विनंक्ष्यंति दुर्भिक्षकरपीडिताः ॥ शीतवातातपप्रावृड्हिमैरन्योन्यतः प्रजाः ॥१०॥
क्षुत्तृड्भ्यां व्याधिभिश्चैव संतप्स्यंते च चिंतया ॥ त्रिंशद्विंशति वर्षाणि परमायुः कलौ नृणां ॥११॥ क्षीय
माणेषु देहेषु ॥ देहिनां कलिदोषतः ॥ वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणां ॥ ॥ ॥ १२ ॥ ॥

दूरे वर्तमानं वारि तदयनं न तु योगस्नानं न जलाशयस्तीर्थं न तु गुर्वादि लावण्यं केशधार्यमाणेषु एषां स्त्रीशो
भेति ॥ उदरंभरता स्वार्थः पुरुषार्थः न तु भित्तवे भित्तादा स्यति ॥ सत्यत्वे सति धार्ष्ट्यमेव मौखर्यमेव न तु ज्ञानप्र
काशेन ॥७॥ आच्छिन्ना अपहृता दारा द्रविणानि च यासां ताः अष्टिर्बीजं ॥९॥ क्षीयमाणेषु क्षिप्रा हिनाद्रष्टं कलौ गते ।
प्राय इति पंचमेनान्वयः ॥ क्षीयमाणेषु अल्पप्रमाणेषु ॥ ॥ ॥ १० ॥ ११ ॥ १२ ॥ ॥ ॥ ॥ ८५

दस्युप्रायेषुचौरत्वलेषुचौर्यानृतवृथाहिंसाद्याःनानावृत्तयोयेषांतेषु॥१३॥छागप्रायासुप्रमाणतःक्षीरतस्वल्पजात
त्वात्स्वस्थास्नुषुवृक्षेषुविद्युत्प्रायेषुतडिद्दृष्टकृत्सुमेघेषुशून्यप्रायेषुधर्मादिरहितेषुसद्मसुगृहेषुजनेषुखरधर्मिणिदुः
सहवोधितेकलौगतप्रायेसमाप्तप्राये॥१६॥एतत्पंचश्लोकीचतुर्भिःचराचरगुरोःश्रीमद्विष्णोरीश्वरस्यैवधर्मत्राणेहेतुःगु
णत्वेश्वरत्वयोःरूपापादनंअखिलस्यविश्वस्यात्मनःकारणस्येतिएवंभूतस्यहरेर्जन्मसाधूनांधर्मत्राणायश्रेयाज

पाषंडप्रचुरेधर्मेदस्युप्रायेषुराजसु॥चौर्यानृतवृथाहिंसानानावृत्तिषुवैनृषु॥१३॥शूद्रप्रायेषुवर्णेषु
छागप्रायासुधेनुषु॥गृहप्रायेष्वाश्रमेषुयौनप्रायेषुबंधुषु॥१४॥अणुप्रायास्वोषधीषुशमीप्रायेषु
स्थास्नुषु॥विद्युत्प्रायेषुमेघेषुशून्यप्रायेषुसद्मसु॥१५॥इत्थंकलौगतप्रायेजनेषुखरधर्मिणि॥धर्मत्रा
णायसत्वेनभगवानवतरिष्यति॥१६॥चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः॥धर्मत्राणायसाधूनां
जन्मकर्मापनुत्तये॥१७॥शंभलग्राममुख्यस्यब्राह्मणस्यमहात्मनः॥भवनेविष्णुयशसःकल्किःप्रादु
र्भविष्यति॥१८॥अश्वमाशुगमारुह्यदेवदत्तंजगत्पतिः॥असिनासाधुदमनमष्टैश्वर्यगुणान्वितः॥१९॥
विचरन्नाशुनाक्षोण्यांहयेनाप्रतिमद्युतिः॥नृपलिंगछदोदस्यून्कोटिशोनिहनिष्यति॥ ॥२०॥ ॥

नमात्दधर्मापनुत्तयेमोक्षाय॥१७॥शंभलग्रामेमुख्यस्यप्रधानस्यनाम्नाविष्णुयशसःब्राह्मणस्यभवनेगृहेअसौभ
विष्यतिनजातःस्यादितिः॥१८॥धर्मत्राणकारमाह॥अखिलमितिअसाधवोदस्यवस्तेयेनतमश्वमारुह्य॥असिनाद
स्यून्कोटिशोनिहनिष्यतीत्युत्तरेणान्वयः॥असाधुदमनइतिपाठे॥कल्किविशेषणं॥ ॥२०॥ ॥

श्री भा टी ९

तत्रपिंचः आशुनाशीघ्रगामिनाहयेनलोएपं भूमौविचरन्अणिमाद्यष्टैश्वर्यगुणाश्चसत्यसंकल्पादयःतैरन्विताःद
पलिंगछद्मराजवेशस्तान्हइतिपूर्वस्यटीका॥२०॥ततश्चपुनःकृतयुगप्रवृत्तिंक्रममाह॥अथेतिसार्धाभ्यांतेषांपौरजा
नपदानांमनांसिविशदानिभविष्यंति॥तत्रहेतुः श्रीवासुदेवस्याङ्गरागेणचंदनादिनातिपुण्यगंधोनिलःतस्य
शतीतितथातेषां॥२१॥अथविष्टःस्थूलः॥२२॥कृतयुगप्रवृत्तिमाह॥यदावतीर्णइतिप्रजानांसूतिःप्रसूतिः॥२३॥तदेव
तारकालोपलक्षणमाह॥यदाचंद्रश्चेतितिष्यःपुष्योनामनक्षत्रःअयमर्थःचंद्रसूर्यबृहस्पतीनांयदापुष्यनक्षत्रे
योगःतदातत्कृतंकृतयुगंभविष्यतीति॥यद्यपिप्रतिद्वादशाब्दंकर्कराशौबृहस्पतौवर्तमानेद्विजास्त्वमावस्यासुते

अथतेषांभविष्यंतिमनांसिविशदानिवै॥वासुदेवाङ्गरागातिपुण्यगंधानिलस्पृशां॥२१॥पौरजानपदानां
वैदेहेतेष्वखिलस्मृषु॥तेषांप्रभाविसर्गश्चस्थविष्ठःसंभविष्यति॥२२॥वासुदेवेभगवतिसत्त्वमूर्तौहृदिस्थि
ते॥२२॥यदावतीर्णोभगवान्कल्किर्धर्मपतिर्हरिः॥कृतंभविष्यतितदाप्रजासूतिश्चसात्विकी॥२३॥यदाचं
द्रश्चसूर्यश्चतथातिष्यबृहस्पती॥एकराशौसमेष्यंतितदाभवतितत्कृतं॥२४॥येतीतावर्तमानायेभविष्या
तिचपार्थिवाः॥तेतउद्देशतःप्रोक्तावंशीयाःसोमसूर्ययोः॥२५॥आरभ्यभवतोजन्मयावन्नंदाभिषेचनं एतत्

षांत्रयाणामपिपुष्ययोगःसंभविष्यतितथापितेषांत्रयाणामपिसहप्रवेशोत्रविवक्षितः॥समेष्यंतीतिवचनात्
तोनातिप्रसंगः॥२४॥एवंनवमस्कंधमारभ्यअनुक्रांतेवैवस्वतमनोर्वंशद्वयेनिगमयति॥येतीताइतिउद्देशतःसंक्षे
पतः॥२५॥कलियुगावासांतरविशेषवक्तुमाहआरभ्येत्यादिनावर्षसहस्रंपंचदशोत्तरंशतंचेतिकयापिविवक्षा
यावांतरसंख्येयंवस्तुतःपरीक्षिन्नंदयोरंतरंद्वाभ्यांन्यूनंवर्षाणांसार्धसहस्रंभवति॥यतःपरीक्षित्समकालेमागधे
मार्जारमारभ्यरिपुंजयांताःविंशतीराजानःसहस्रंसंवत्सरंभोक्ष्यंतीत्युक्तंनवमस्कंधेयेबार्हद्रथभूपालाभाव्याःस

कलेः प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपलक्षणमाह॥ सप्तर्षीणां त्विति त्र्यमर्थः॥ प्रागग्रशकटाकारं
तारासप्तकं सप्तर्षिमंडलं तत्र किंचिदुन्नते तेषामग्रस्थानीयो मरीचिः ततः पश्चादानम्रकंधराकारो वसिष्ठः
सभार्यः ततः पश्चादीषदुन्नते तेषां मूलस्थानीयोंगिराः ततः पश्चात्समतलचतुष्के ईशाने अत्रिः ततो दक्षि
णतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहः ततउत्तरतः क्रतुः एवं स्थितेषु तेषां मध्ये यौ पूर्वौ उदयसमये प्रथ
मउदितौ पुलहक्रतुसंज्ञौ तयोस्तु मध्ये तयोश्च पूर्वं योश्च मध्ये यत्समं दक्षिणतः समरेखावस्थितं अश्वि
न्यादिषु नक्षत्रेषु यदन्यतमं नक्षत्रं दृश्यते तेन तथैव युक्ता नृणामब्दशतं तिष्ठंति ते च द्विजाः त्वदीये काले

सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि॥ तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि॥ २७॥
तेनैते ऋषयो युक्तास्तिष्ठंत्यब्दशतं नृणां॥ ते त्वदीये द्विजाः काले अधुना चाश्रिता मघां
२८॥ विष्णोर्भगवतो भानुः कृष्णाख्योसौ दिवं गतः॥ तदाविशत्कलिर्लोकं पापे यद्रमते
जनः॥ २९॥ यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः॥ तावत्कलिर्वै पृथिवीं पराक्रां
तुं न चाशकत्॥ ३०॥ यदा देवर्षयः सप्त मघासु विचरंति हि॥ तदा प्रवृत्तस्तु कलिर्द्वाद
शाब्दशतात्मकः॥ ३१॥

अधुना मघाश्रिता वर्तंते॥ २८॥ तेषु मघास्ववर्तमानेषु सत्सु यदा विष्णोर्भानुः भातीति भानुः शुद्धसत्त्वा
त्मको देहः दिवं वैकुंठं गतः तदा कलिर्युगमविशत्॥ यद्यस्मिन्युगे जनः पापे रमत इति कलियुगस्य ल
क्षणम्॥ २९॥ ननु श्रीकृष्णे पृथिव्यां वर्तमानेपि संध्यारूपेण कलिः प्रविष्ट एवासीत् सत्यं तथापि द्विला
वत्तस्य पराक्रमो नाभवदित्यर्थः इत्याह यावदिति पराक्रांतुमभिभवितुं॥ ३०॥ अतो यथोक्त एव कलि
प्रवेशकाल इत्याह॥ यदा देवर्षय इति द्वादशाब्दशतात्मक इति दिव्येन मानेन संध्यासंध्यांशाभ्यां सह यो
द्वादशाब्दशतात्मकः स कलिः तदा संध्यामतिक्रम्य प्रविष्ट इत्यर्थः॥ ३१॥ ॥ ॥

कलेः प्रवेशकालमुक्त्वा तस्य कलेर्वृद्धिकालमाह ॥ यदेति तदा प्रद्योतनात्प्रभृति वृद्धिंगतोपि नंदात्प्रभृत्य
तिवृद्धिंगमिष्यतीत्यर्थः ॥ ३२ ॥ ननु यदा काले लिंगमुपलब्धं तदैव प्रविष्टः इति युक्तं ततः पूर्वमेव प्रवेशः
ततः परं वृद्धिरित्यत्र किं प्रमाणं तत्राह यस्मिन्निति प्रतिपन्नं प्रविष्टं इति ज्ञातं पुराविदः पूर्वस्य ज्ञातारः ॥
३३ ॥ कलेरनंतरं कृतयुगप्रवेशमाह ॥ दिव्याब्दानामिति चतुर्थे कलौ प्रवेशनादूपरिमितेनांशेनापि
सहस्रांते सतीत्यर्थः ॥ कृतयुगप्रवेशचिह्नमाह ॥ यदा नृणां मनः आत्मप्रकाशकं भविष्यति ॥ तदेति

यदा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः ॥ तदा नंदात्प्रभृत्येष कलिर्वृद्धिं करिष्यति
३२ ॥ यस्मिन्कृष्णो दिवं यातः तस्मिन्नेव तदाहनि ॥ प्रतिपन्नं कलियुगं इति प्राहुः पुरावि
दः ॥ ३३ ॥ दिव्याब्दानां सहस्रांते चतुर्थे तु पुनः कृतम् ॥ भविष्यति यदा नृणां मन आत्म
प्रकाशकम् ॥ ३४ ॥ इत्येष मानवो वंशो यथा संख्यायते भुवि ॥ तथा विट्शूद्रविप्रा
णां तास्ता ज्ञेया युगे युगे ॥ ३५ ॥ एतेषां नामलिंगानां पुरुषाणां महात्मनां ॥ कथामात्रा
वशिष्टानां कीर्तिरेव स्थिता भुवि ॥ ३६ ॥ देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः
कलापग्राममासाते महायोगबलान्वितौ ॥ ३७ ॥

३४ ॥ राजवंशोक्तां स्थितिं ब्राह्मणादिवंशेष्वतिदिशति इत्येष इति यथा याभिरुच्चनीचावस्थाभिः
नाख्यातास्ता अवस्थाः वंशा इति च पाठः ॥ ३५ ॥ एतत्कीर्तनस्य वैराग्योपयोगितामाह ॥ एतेषामिति ना
मैव लिंगं ज्ञापकं येषां तेषां कथामात्रेणैवावशिष्टानां कीर्तिरेव स्थिता न तु राज्यं पुत्रादयो वा ॥ ३६ ॥ क
लापग्रामस्थानां राजवंशादीनां पुनः प्रवृत्तिप्रकारमाह ॥ देवापिः सोमवंशजः मरुस्तु सूर्यवंशजः
कलापग्रामो नाम योगिनामावासः प्रसिद्धः ॥ ३७ ॥ श्रीराम ॥

इममेवप्रकारंप्रतिवक्तुंयुगंप्रदर्शयतिकृतमितिनि ॥ ३९ ॥ एतेषांनाममात्रंगतानामित्यादिश्लोकद्वयंप्रपंचयति ॥ या
तांस्त्रिभिःपंचभिः ॥ ४० ॥ ममत्वंकृत्वेत्यनेनसूचितं ॥ भूतद्रोहंतत्रनिंदयति ॥ क्रिमीति ॥ राजन्नाम्नः ॥ राजेतिना
मयस्यतस्यापिदेहस्यांतेक्रिमिविड्भस्मेतिवासंज्ञाभविष्यतितत्कृतेतदर्थंयोभूतद्रुक्भूतेभ्योद्रुह्यतिस

ताविहैत्यकलेरंतेवासुदेवानुशिक्षितौ ॥ वर्णाश्रमयुतंधर्मंपूर्ववत्प्रथयिष्यतः ॥ ३८ ॥
कृतंत्रेताद्वापरंचकलिश्चेतिचतुर्युगम् ॥ अनेनक्रमयोगेनभुविप्राणिषुवर्तते ॥ ३९ ॥ राजन्ने
तेमयाप्रोक्तानरदेवास्तथापरे ॥ भूमौममत्वंकृत्वांतेहित्वेमांनिधनंगताः ॥ ४० ॥ क्रिमिवि
ड्भस्मसंज्ञांतेराजन्नाम्नोपियस्यच ॥ भूतध्रुक्तत्कृतेस्वार्थंकिंवेदनिरयोयतः ॥ ४१ ॥ कथंसे
यमखंडाभूःपूर्वैर्मेपुरुषैर्धृता ॥ मत्पुत्रस्यचपौत्रस्यमत्पूर्वावंशजस्यच ॥ ४२ ॥ तेजोब
लेमयंकायंगृहीत्वात्मतयाबुधः ॥ महींममतयाचोभौहित्वांतेदर्शनंगताः ॥ ४३ ॥ येये
भूपतयोराजन्भुंजंतिभुवमोजसा ॥ कालेनतेकृताःसर्वेकथामात्राःकथासुच ॥ ४४ ॥ इ
ति श्रीभागवते द्वादशस्कंधे द्वितीयोध्यायः ॥ २ ॥

किंस्वार्थंवेदकुतइत्यपेक्षायांहेतुत्वेनभूतद्रोहंविशिनष्टियतोभूतद्रोहान्निरयोभवतीति ॥ ४१ ॥ ममत्व
प्रकारंप्रपंचयति ॥ कथमितिसेयमखंडाभूःमेपूर्वजैःपुरुषैःधृतासतीइदानींमत्पूर्वाचसतीमत्पुत्रा
देःकथंस्यादित्येवं ॥ ४२ ॥ उभौमहींकायंचअदर्शनंमृत्युं ॥ ४३ ॥ उपसंहरतियेयइतितेसर्वेचकथासु
क्रियमाणासुकथामात्राःकृताः ॥ ४४ ॥ द्वादशेद्वितीयः ॥ २ ॥ श्रीराम ॥ ॥

श्री· भा· द्वा· टी· ७

तृतीये भूमिगीतैश्च राज्ञां दोषादि वर्ण्यते ॥ कलौ च दोषभूयिष्ठे दोषहृच्छ्रीहरीरितः ॥ देहेहंतां भूमौ च ममतां कुर्वं-
त्यतो वृथा इत्युक्तं ॥ तदेव भूमिगीतैः प्रपंचयति ॥ दृष्ट्वेत्यादिना आत्मनि स्वस्यां जये व्यग्रान् ॥ उपयुक्तान् ॥ हा-
सप्रकारमाह ॥ अहो इति ॥ १ ॥ येन कामेन फेनोपमे पिंडे देहे विस्रंभिता विश्वासवंतो ये तेषां नरेंद्राणां स ए-
व कामो मोघ एव स्यात् ॥ २ ॥ काममेव दर्शयति द्वाभ्यां पूर्वमिति इंद्रियार्थलंपटस्य न राज्यप्राप्तिः स्यात् इति
प्रथममिंद्रियषड्वर्गं निर्जित्य राजमंत्रिणो जेष्यामः वशीकरिष्यामः सचिवा अमात्याः करींद्राः हस्तिपाः

श्रीशुकः ॥ दृष्ट्वात्मनि जये व्यग्रान्नृपान्हसति भूरियम् ॥ अहो मां विजिगीषंति मृत्योः
क्रीडनका नृपाः ॥ १ ॥ काम एष नरेंद्राणां मोघः स्याद्विदुषामपि ॥ येन फेनोपमे पिंडे येहि
विस्रंभिता नृपाः ॥ २ ॥ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः ॥ ततः सचिवपौराप्तक-
रींद्रानस्य कंटकान् ॥ ३ ॥ एवं क्रमेण जेष्यामः पृथ्वीं सागरमेखलाम् ॥ इत्याशाबद्धहृद-
या न पश्यंत्यंतिकेंतकम् ॥ ४ ॥ समुद्रावरणां जित्वा मां विशंत्यब्धिमोजसा ॥ किय-
दात्मजयस्यैतन्मुक्तिरात्मजये फलम् ॥ ५ ॥ यां विसृज्यैव मनवः तत्सुताश्च कुरूद्व-
ह ॥ गता यथागतं युद्धे तां मां जेष्यंत्यबुद्धयः ॥ ६ ॥ मत्कृते पितृपुत्राणां भ्रातॄणां चापि वि-
ग्रहः ॥ जायते ह्यसतां राज्ये ममताबद्धचेतसां ॥ ७ ॥

तांश्च जेष्यामः कंटकान्प्रतिपक्षान् अस्य अपास्य अथ कंटकानिति वा पाठः ॥ ३ ॥ एवं केचिदाशा-
बद्धहृदयाः ॥ ४ ॥ एवं केचित्पुनर्मां जित्वाप्यतितृष्णया अब्धिं विशंति ॥ तदेवमिंद्रियजयेन ये राज्यं साध-
यितुमिच्छंति तेऽतिमंदा इत्याह ॥ कियदिति ॥ अत अंतकं न पश्यंतीत्युक्तं ॥ ५ ॥ तदेवाह ॥ यामिति कुरू-
द्वह हे इति भूमिगीतं कथयन् श्रीशुकः पि: संबोधयति कुलोद्वह इति वा पाठः सुगमः ॥ ६ ॥ अत्र युद्धे यदु-
क्तं तत्प्रपंचयति ॥ मत्कृत इति ॥ ७ ॥ ॥ राम ॥ ॥

राम ७

रामो नाम कश्चिद्राजा॥ यद्वा लोकहृत्प्रादशरथस्थितैव निर्दिष्टः॥९॥ लोकं रावयतीति लोकराव
णः॥१०॥ मयि उत्पन्ने मे ममतां कृत्वा ये एवं ते ते कालेन कथावशेषाः कृताः॥ विमो इति संबोधनं कृष्ण हे द्वे हे तिव
त॥११॥ राजवंशानुकथनस्य तात्पर्यमाह॥ कथा इमा इति विज्ञानं विषयाभासात् अज्ञानं तनो वैराग्यं तयो
र्विवक्षया परिपुष्टां प्रसूतानां च यो विभूतीः वा विलासमात्ररूपाः॥ पारमार्थ्यं परमार्थं प्रभुक्तं कथनं न म

ममैवेयं मही कृत्स्नानन्ते मूढे इति वादिनः॥ स्पर्धमाना मिथो नूनं निम्रियन्ते मत्कृते नृपाः॥८॥
पृथुः पृथुरत्नाभावाद्यैः कृष्णो भरतो ज्ञेनः॥ मांधाता नाम नाभो रामः लक्ष्मणो धुंधुहा रघुः॥९॥ त
ण बिंदुर्ययातिः शर्यातिः शंतनुर्गयः॥ भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः
१०॥ हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः॥ नमुचिः शंबरो भौमो हिरण्याक्षोऽनार
कः॥११॥ अन्ये च बहवो दैत्या राजानो ये महेश्वराः॥ सर्वे सर्वविदः शूराः सर्वे सर्वजितो
जिताः॥१२॥ ममतामभवन्नंते कृत्वा उत्पन्ने मेऽत्र धर्मिणः॥ कथावशेषाः कालेन दृष्टा कृतार्थाः
कृता विमो॥१३॥ कथा इमास्ते कथिता महीयसां विताय लोके पृथुयशः परेषां॥ विज्ञा
न वैराग्य विवक्षया विमो वचो विभूतीर्न तु पारमार्थ्यं॥१४॥ यस्तूत्तमश्लोकगुणानुवा
दः संगीयतेभीक्ष्णममंगलघ्नः॥ तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्स
मानः॥१५॥ शुको वाच॥ केनोपायेन भगवन्कलेर्दोषान्कलौ जनाः॥ विधमिष्यंत्युप

चितान्मर्थे:॥१६॥ कलिर्हि पुरुषाणां पापादेश्च परमार्थं तमाह॥ यस्त्विति नित्यं प्रत्यहं तत्राप्यभीक्ष्णं
१७॥ कलिदोषोपचये सति भक्तिर्संभवं मन्यमानः पृच्छति केनोपायेनेति विधमिष्यंति नाशयि
ष्यंति॥ यथा यथावत्॥१८॥ ॥ श्रीराम ॥ श्रीकृष्ण ॥

कलियुगे कः परो धर्म इति बुभुत्सया पृच्छति युगानीति वृत्तीस्तत्त्वं गः आत्यंतिकजिज्ञासया पुनः पृच्छ-
ति प्रलयकल्पयोः संहारस्थितिकालयोः न वा यं बहिर्मुखैः प्रश्न इत्याह कालस्येति ॥१७॥ तत्र तु युग-
धर्मांस्तावदाह ॥ कृत इति तज्जनैस्तत्कालीनैर्जनैः दानमत्राहिंसनतयाऽभयदानं तदेव प्रथमस्कं-
धे शौचं चात्र तेनोक्तं विभोस्तद्रूपस्य धर्मस्य ॥१८॥ तदानीन्तनजनानाह ॥ संतुष्टा इति मैत्राः भूतमै-
त्रीयुक्ताः श्रमणा आत्माभ्यासवंतः ॥१९॥ अंशोत्र ब्राह्मणाधिकाः ॥२१॥ अनृतेन सत्यं हिंसया

युगानि युगधर्मांश्च मानं प्रलयकल्पयोः ॥ कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः ॥१७॥
श्रीशुकः ॥ कृते प्रवर्तते धर्मः चतुष्पात्तज्जनैर्धृतः ॥ सत्यं दया तपो दानमिति पादा विभोर्नृप
१८॥ संतुष्टाः करुणा मैत्राः शांता दांतास्तितिक्षवः ॥ आत्मारामाः समदृशः प्रायशः श्रमणा
जनाः ॥१९॥ त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः ॥ अधर्मपादैरनृतहिंसाऽसंतोषवि-
ग्रहैः ॥२०॥ तदा क्रियातपोनिष्ठा नातिहिंस्रा न लंपटाः ॥ त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा
नृप ॥२१॥ तपःसत्यदयादानेष्वर्धं ह्रसति द्वापरे ॥ हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः
२२॥ यशस्विनो महाशालाः स्वाध्यायाध्ययने रताः ॥ आढ्याः कुटुंबिनो हृष्टा वर्णाः क्ष-
त्रद्विजोत्तराः ॥२३॥ कलौ तु धर्महेतूनां तुर्यांशोऽधर्महेतुभिः ॥ एधमानैः क्षीयमाणो ह्यंते
सोऽपि विनंक्ष्यति ॥२४॥

दया असंतोषेण तपः विग्रहेण दानमिति यथासंख्यं योज्यं हिंसातुष्ट्यनृतद्वेषैरित्ययं क्रमो न वि-
वक्षितः ॥ धर्मस्यार्धं ह्रसति क्षीयते ॥ अधर्मस्य लक्षणैः चिह्नैः पादैरित्यर्थः ॥२२॥ यशस्विनः कीर्तिप्रि-
याः तत्र द्विजोत्तराः क्षत्रियब्राह्मणप्रधानाः ॥२३॥ कलौ धर्मपादानां तुर्यांशः चतुर्थांशोऽवशिष्यते

शूद्रदासोत्तराः शूद्रकैवर्तादिप्रधानाः ॥ २५ ॥ युगानामेवंभूतं वैधर्म्ये कारणमाह ॥ सत्त्वमितित्रिभिः ॥ २६ ॥
मनश्च बुद्धिश्चेंद्रियाणि च सत्त्वे यदा प्रभवंति अतिशयेन वर्तंते ॥ २७ ॥ यदा कर्मादिषु भक्तिः प्रीतिः तदा रजोवृ-
त्तिप्रधानं त्रेतायुगं जानीहि ॥ २८ ॥ काम्यानां कर्मणां विषये यदा प्रीतिः तत्तदा रजस्तमः प्रधानं द्वापरं जानीहि
२९ ॥ विषादनं दुःखं ॥ ३० ॥ कलिदोषान्प्रपंचयति ॥ यस्मादित्यादिना ॥ यस्मात्कलेर्हेतोः क्षुद्रदृशः मंदमत

तस्मिंल्लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः ॥ दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः ॥ २५ ॥
सत्त्वं रजस्तम इति दृश्यंते पुरुषे गुणाः ॥ कालसंचोदितास्ते वै परिवर्तंत आत्मनि ॥ २६ ॥ प्रभवं-
ति यदा सत्त्वे मनोबुद्धींद्रियाणि च ॥ तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः ॥ २७ ॥ यदा कर्म-
सु काम्येषु भक्तिर्भवति देहिनाम् ॥ तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमान् ॥ २८ ॥ यदा लो-
भस्त्वसंतोषो मानो दंभोथ मत्सरः ॥ कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः ॥ २९ ॥ यदा
मायानृतं तंद्रा निद्रा हिंसा विषादनम् ॥ शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः ॥ ३० ॥
यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः ॥ कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियो-
सतीः ॥ ३१ ॥ दस्यूत्कृष्टा जनपदा वेदाः पाषंडदूषिताः ॥ राजानश्च प्रजाभक्ष्याः शिश्नोदरप-
रा द्विजाः ॥ ३२ ॥ अव्रता वटवोशौचा भिक्षवश्च कुटुंबिनः ॥ तपस्विनो ग्रामवासा न्यासिनो

भा॰ द्वा॰ स्कं॰ ॥ ११

यः क्षुद्रभाग्याः अल्पभाग्याः महाशनाः बह्वाहाराः वित्तहीनाश्चापि कामिनः स्वैरिण्यः पुंश्चल्यः
असतीः असत्यः ॥ ३१ ॥ दस्युवत् उत्कृष्टाः प्रवृद्धा येषु ते ॥ ३२ ॥ अव्रताः विहिताचारशून्याः अशौचाः शौचर-
हिताश्च वटवो ब्रह्मचारिणो भविष्यंति ॥ कुटुंबिनश्च गृहस्थाः स्वयं भिक्षाटनपरा भविष्यंति न तु भि-
क्षां दास्यंति ॥ तपस्विनो वनस्थाः वनं हित्वा ग्रामवासा भविष्यंति ॥ न्यासिनो यतयः अतिलोलुपाः भ-
विष्यंति ॥ ३३ ॥

श्री० भा० द्वा० टी० २

पुत्रापि स्त्रीणां स्वभावमाह ॥ ह्रस्वकाया इति कटुकभाषिण्यः इति अप्रियभाषिण्यः अप्रियवादिनः चौर्यं च मा
याकपटं च उरु साहसं च यासां ताः ॥ ३४ ॥ किं च किराताः वणिजः पणयिष्यंति ॥ किं च सर्वे जनाः अनापद्यपि जुगु
प्सितां निंदितां वार्त्तां वृत्तिं साधु मंस्यंते ॥ ३५ ॥ सर्वोत्तममपि पतिं निर्द्रव्यं हीनं भृत्याः त्यक्ष्यंति पतयोपि भृत्यं वि
पन्नं रोगादिभिः अपाटवं कौलं कुलपरंपराप्राप्तं त्यक्ष्यंति अपयस्विनीः दुग्धदोहाः ॥ ३६ ॥ सौरतं स्त्रीरत ३
निमित्तं सौहृदं येषां ते ॥ अत एव ननंदा भर्तृभगिनी श्यालो भार्याभ्राता तैः संवादो मंत्रालोचनं

ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः ॥ शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः
॥ ३४ ॥ पणयिष्यंति वै क्षुद्राः किराताः कूटकारिणः ॥ अनापद्यपि मंस्यंते वार्त्तां साधुजु
गुप्सिताम् ॥ ३५ ॥ पतिं त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमम् ॥ भृत्यं विपन्नं पतयः
कौलं गाश्चापयस्विनीः ॥ ३६ ॥ पितृभ्रातृसुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः ॥ ननंदृश्याल
संवादा दीनाः स्त्रैणाः कलौ नराः ॥ ३७ ॥ शूद्राः प्रतिग्रहीष्यंति तपोवेषोपजीविनः ॥
धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनम् ॥ ३८ ॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शि
ताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ ३९ ॥ वासोन्नपानशयनव्यवायस्नानभू
षणैः ॥ हीनाः पिशाचसंदर्शा भविष्यंति कलौ प्रजाः ॥ ४० ॥ कलौ काकिणिकेप्यर्थे
विगृह्य त्यक्तसौहृदाः ॥ त्यक्ष्यंति हि प्रियान्प्राणान् हनिष्यंति स्वकानपि ॥ ४१ ॥ न रक्षि
ष्यंति मनुजाः स्थविरौ पितरावपि ॥ पुत्रान्सर्वार्थकुशलान् क्षुद्राः शिश्नोदरंभराः ॥ ४२ ॥
कलौ न राजन् जगतां परं गुरुं त्रैलोक्यनाथानतपादपंकजम् ॥ प्रायेण मर्त्या भगवंतमच्यु
तं यक्ष्यंति पाषंडविभिन्नचेतसः ॥ ४३ ॥

येषां ते ननंद्रिति पाठः ॥ ३७ ॥ पिशाचसंदर्शाः पिशाचसदृशाः ॥ ४० ॥ काकिणिके विंशतिवराटिकामा
त्रेप्यर्थे विषयभूते विगृह्य वैरं कृत्वा ॥ ४१ ॥ महांतमनर्थमाह द्वाभ्यां कलाविति त्रिलोकनाथैः आनतं नम राम
स्कृतं पादपंकजं यस्य तं न यक्ष्यंति न याजयिष्यंति पाषंडैर्विभिन्नं अन्यथाकृतं चेतो येषां ते ॥ ४३ ॥ २

विवशो गृणन्नाम विमुक्ताः कर्मरूपा अर्गलाः प्रतिबंधा यस्य सः || ४४ || नन्वेवं कलिदोषान् प्रपंचं नीत्वा
तत्त्वतस्तन्निस्तारोपायमाह || पुंसामिति षड्भिः द्रव्यदेशात्मभिः संभवो येषां तान् चित्तस्थः चित्ते स्फुरितः ||
४५ || अयमेवोपायो नान्य इति दृष्टान्तमाह || यथेति || धातुजं ताम्रादिसंसर्गजं यद्दुर्वर्णं मलिनस्व
भावं मालिन्यं तत्र स्थितोऽवह्निरेव हरति तथा योगिनामपि विष्णुरेव न तु योगादिकमित्यर्थः || ४७

यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान् || विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः || ४४ || पुंसां कलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् || सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः || ४५ || श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोऽपि वा || नृणां धुनोति भगवान्हृत्स्थो जन्मायुताशुभम् || ४६ || यथा हेम्नि स्थितो वर्णो दुर्वर्णं हंति धातुजम् || एवमात्मगतो विष्णुर्योगिनामशुभाशयम् || ४७ || विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः || नात्यंतशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनंते || ४८ || तस्मात्सर्वात्मना राजन्हृदिस्थं कुरु केशवम् || म्रियमाणो ह्यवहितस्ततो यासि परां गतिम् || ४९ || म्रियमाणैरभिध्येयो भगवान्परमेश्वरः || आत्मभावं नयत्यंग सर्वात्मा सर्वसंश्रयः || ५० || कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः || कीर्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत् || ५१ || कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः || द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् || ५२ || इति श्रीभागवते द्वादशस्कंधे तृतीयोध्यायः || ३ ||

एतदेव विद्वत्ता नित्य विद्या गायत्र्यादिदेवतोपासना || ४८ || आत्मभावं स्वस्वरूपम् || ५० || इदानीं कलिं स्तौति
द्वाभ्याम् || कलेर्दोषनिधे राजन्निति || ५१ || तस्मात्सर्वं हरिकीर्तनादेव कलौ भवति || ५२ || इति श्रीभावार्थ
दीपिकायां द्वादशस्कंधे तृतीयोध्यायः || ३ || चतुर्थे तु चतुर्धोक्तः कालः प्रलयनैमित्तिकादयः || तत्र सं
सारनिस्तारो हरिकीर्त्यैव वर्ण्यते || १ || || श्रीगोविंदाय नमः || ||

श्री·
भा·द्वा·
टी·
९

कलिदोषनिवर्तकं हरिसंकीर्तनादिकं॥ सएव च परमो धर्मः कलाविति प्रश्नद्वयस्योत्तरं उक्तं यथान्यत्स्पष्टं प्रलय
कल्पयोर्मानं ब्रूहीति॥ तदिदानीं तृतीयस्कंधोक्तकालानुवादपूर्वोक्तं वेकं निरूपयति कालइति॥ सकालः परमा
णुर्वै योभुंक्ते परमाणुतामित्यादिना कालः कथितः॥ चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्॥ संख्याता
नि सहस्राणि द्विगुणानि शतानि चेति युगमानं च कथितं॥ १॥ तत्र कल्पमानमाह॥ चतुर्युगेति यत्र चतुर्द
श मनवः क्रमेण भवंति॥ २॥ प्रलयस्तु चतुर्विधः॥ नैमित्तिकः प्राकृतिक आत्यंतिको नित्यश्चेति॥ तत्र नै

श्री शुकः॥ कालस्ते परमाण्वादिर्द्विपरार्धावधिर्नृप॥ कथितो युगमानं च शृणु कल्पलया
वपि॥ १॥ चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते॥ स कल्पो यत्र मनवश्चतुर्दश विशांपते॥ २
तदंते प्रलयस्तावान्ब्राह्मी रात्रिरुदाहृता॥ त्रयो लोका इमे तत्र कल्पंते प्रलयाय हि॥ ३॥ एष
नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक॥ शेतेऽनंतासनो विश्वमात्मसात्कृत्य चात्मभूः॥ ४
द्विपरार्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः॥ तदा प्रकृतयः सप्त कल्पंते प्रलयाय वै॥ ५॥ एष प्रा
कृतिको राजन्प्रलयो यत्र लीयते॥ अंडकोशस्तु संघातो विघात उपसादिते॥ ६॥ पर्जन्यः श
तवर्षाणि भूमौ राजन्न वर्षति॥ तदा निरन्ने ह्यन्योन्यं भक्ष्यमाणाः क्षुधार्दिताः॥ ७॥ क्षयं या
स्यंति शनकैः कालेनोपद्रुताः प्रजाः॥ ८
श्रीरामाय नमः॥

मित्तिकं प्रलयं मानसहितमाह॥ तदंतइति द्वाभ्यां तावान् चातुर्युगसहस्रप्रमाणः सैव ब्राह्मी रात्रिः॥ ३॥ नै
मित्तिकत्वं दर्शयति॥ यत्र यदा विश्वसृक॥ श्रीनारायणः॥ विश्वमात्मसात्कृत्य॥ स्वस्मिन्नुपसंहृत्य शेते॥ आ
त्मभूर्ब्रह्मा तस्मिन् शेते॥ तयोरभेदविवक्षया वा॥ ब्रह्मण एवानंतासनत्वमुक्तं॥ ब्रह्मणो निद्रां निमित्तीकृत्य प्र
वर्तमानो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः॥ ४॥ प्राकृतिकप्रलयमाह द्वाभ्यां द्विपरार्धे तु ब्रह्मणः आयुषि
महदहंकारपंचतन्मात्राणि॥ ५॥ संघातः महदादिकार्यभूतः प्रकृतीनां तत्कार्ये ब्रह्मांडस्य च लयात्प्राकृतिक
इत्यर्थः॥ विघाते कारणे उपसादिते सति॥ ६॥ तदेवाह पर्जन्य इत्यादिना बुद्धींद्रियादिरूपेणेत्यर्थः प्राक्तनेन ग्रंथे
न॥ ७॥ राम
९

सामुद्रादिकं सर्वं रसं रविः पिबते आकर्षति ॥८॥ अनिलवेगाढ्यः वायुवेगोद्धतः ॥ अनिलवेगो वा इति पाठे ॥ अनिले
न वेगो यस्य सः रविणा रश्मिभिः पीतमुदकं च दहतीत्यर्थः अनिलवेगो वा इति तु पाठः सुगमः भूविवरान्पाताला
दीन् शून्यान् रविणा दैहिकरसाकर्षणेन प्राणिरहितान् ॥९॥ शिखाभिर्ज्वालाभिः ॥१०॥ किंचिदधिकं वर्षाणां श

सामुद्रं दैहिकं भौमं रसं सांवर्तको रविः ॥ रश्मिभिः पिबते घोरैः सर्वं नैव विमुंचति ॥८॥ ततः
संवर्तको वह्निः संकर्षणमुखोत्थितः ॥ दहत्यनिलवेगाढ्यः शून्यां भूविवरांस्तथा ॥९॥ ऊर्ध्वमधः
समंताच्च शिखाभिर्वह्निसंचयाः ॥ दह्यमानं विभात्येतद्दग्धगोमयपिंडवत् ॥१०॥ ततः प्रचंड
पवनो वर्षाणामधिकं शतम् ॥ परः संवर्तको वाति धूम्रं खं रजसावृतम् ॥११॥ ततो मेघकुलान्यत्र
चित्रवर्णान्यनेकशः ॥ शतं वर्षाणि वर्षंति नदंति भृशमस्वनैः ॥१२॥ तत एकोदकं विश्वं ब्रह्मांडवि
वरांतरम् ॥१३॥ तदा भूमेर्गंधगुणं ग्रसंत्यापस्तदाप्लवे ॥ ग्रस्तगंधात्ततः पृथिवी प्रलयत्वाय कल्पते
॥१४॥ अपां रसमथो तेजस्ताल्लीयंते यत्नीरसाः ॥ ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा ॥१५॥ लीय
ते चानिले तेजो वायोः खं ग्रसते गुणम् ॥ सर्वविशति खं रजं तन्नभसो गुणम् ॥१६॥ शब्दं
ग्रसति भूतादिस्तेन भस्मतत्र लीयते ॥ तेजसश्चेंद्रियाण्यंगदेवा वैकारिको गुणैः ॥१७॥ महांश्च
संत्यहंकारं गुणः सत्वादयश्च तम् ॥ ग्रसते व्याकृतं रजं गुणाः कालेन चोदितम् ॥१८॥ ॥

म
तं सांवर्तकः परो वायुर्वाति ॥ तदा रजसावृतं खं धूम्रं भवति ॥११॥ भृशस्वनैः तीव्रगर्जितैः ॥१२॥ ब्रह्मांडविवरां
तरं ब्रह्मांडविवरमध्यगतं विश्वं ॥ एकोदकं ॥ एकार्णवोदकाप्लुतं भवति ॥१३॥ उदप्लवे उदकेन प्लाविते सति
प्रलयत्वाय अभावाय ॥१४॥ भूतादिस्तामसोऽहंकारः गुणैस्त्रिभिः सह ॥१७॥ अव्याकृतं प्रधानं ॥१८॥ ॥

तस्य तु लयो नास्तीत्याह || न तस्येति कालावयवैर् अहोरात्रादिभिः गुणा भावविकाराः परिणामः अव्यक्तं अपि तु
विकारशून्यं नित्यं सर्वदैकरूपं वृद्धिरहितम् इत्यर्थः || अव्ययम् अपक्षयशून्यं सर्वहेतुः कारणम् इति || १९ || किं
च वागादिगोचरस्य सविशेषस्य विकारा भवन्ति || इदं तु न तथेत्याह || न यत्रेति द्वाभ्यां लोककल्पः लोकरूपः
सन्निवेशो रचनाविशेषः || २० || स्वप्नजाग्रत् स्वप्नजागरावस्थायुक्तं सुषुप्तवत् || इन्द्रियाद्यभावात् || शून्यस्या
दृश्यहेतुः अप्रतर्क्यं तथापि न शून्यं एवेत्याह || तदिति || २१ || उपसंहरति लय इति शक्तयः सत्त्वादयः || २२

न तस्य कालावयवैः परिणामादयो गुणाः || अनाद्यनन्तम् अव्यक्तं नित्यं कारणम् अव्ययं || १९
न यत्र वाचो न मनो न सत्त्वं न मो रजो वा महदादयो ऽमी || न प्राणबुद्धीन्द्रियदेवता वा न सन्निवे
शः खलु लोककल्पः || २० || न स्वप्नजाग्रन् न च तत् सुषुप्तं न खं जलं भूर् अनिलो ऽग्निर् अर्कः || संसु
प्तवत् शून्यवद् अप्रतर्क्यं तन् मूलभूतं पदम् आमनन्ति || २१ || लयः प्राकृतिको ह्य् एष पुरुषाव्य
क्तयोर् यदा || शक्तयः संप्रलीयन्ते विवशाः कालविद्रुताः || २२ || बुद्धीन्द्रियार्थरूपेण ज्ञानं
भाति तदाश्रयम् || दृश्यत्वाव्यतिरेकाभ्याम् आद्यन्तवद् अवस्तु यत् || २३ ||

आत्यन्तिकं लयम् आह || बुद्धीन्द्रियेति त्रिभिः || आत्यन्तिको लयो मोक्षः || स च ब्रह्मज्ञानेन सर्वप्रपंचलया
त्मकः || न च प्रपंचस्यात्मवत्सत्त्वे लयः संभवतीति ज्ञानरूपाद् ब्रह्मणः पृथक्तया असत्त्वम् उपपादयति
बुद्धिश्च इन्द्रियाणि च अर्थाश्चेत्येवं ग्राहककरणग्राह्यरूपेण तेषाम् आश्रयं ज्ञानम् एव भाति न पृथक् तत्र
हेतुम् आह || दृश्यत्वाव्यतिरेकाभ्याम् इति || अन्यथा आद्यन्तवद् अवस्तु अत्रैव प्रयोगः विमतं सत् न भवति
दृश्यत्वात् || कारणाव्यतिरेकात् || आद्यन्तवत्त्वाच्च रज्जुसर्पादिवद् इति || २३ ||

तत्राव्यतिरेकंदृष्टान्तेनप्रपंचयति ॥ दीपइति ॥ दीपवत्स्वरूपाणांतेजोविशेषाणांयथातेजसोनव्यतिरेकः ॥ तथा
धीःकर्त्रीखानिकरणानिमात्राविषयाःअन्यतमाद्ब्रह्मणःपृथग्नस्युःब्रह्मकार्यत्वात् ॥ नन्वेवंकार्यकारणयोरभेदेका
र्योऽसत्वेकारणस्याप्यसत्वंप्रसज्येत ॥ तत्राहअन्यतमादितिकार्यदन्यतमात्व्यतिरिक्ताद्ब्रह्मणः ॥ प्रपंचाद्ब्रह्मणो ॥
ऽतिव्यतिरेकइत्यर्थः ॥ २४ ॥ यदात्वबुद्धेरसत्वंतदातदवस्थानांसुतरामसत्वमित्याशयेनाह ॥ बुद्धेरिति ॥ ननुविश्व
तैजसप्राज्ञानामेताअवस्थानबुद्धेरित्याशंक्याह ॥ मायामात्रमितिइदंविश्वतैजसप्राज्ञरूपं ॥ २५ ॥ आद्यंतव

दीपश्चतत्स्वरूपंचज्योतिर्विनानपृथग्भवेत् ॥ एवंधीःखानिमात्राश्चनस्युरन्यतमाहृतात् ॥ २४ ॥ बु
द्धेर्जागरणंस्वप्नःसुषुप्तिरितिचोच्यते ॥ मायामात्रमिदंद्वैतंनानात्वंप्रत्यगात्मनि ॥ २५ ॥ यथाज
लधराव्योम्निसंभवंतिनभवंतिच ॥ ब्रह्मणीदंतथाविश्वमवयव्युदयाप्ययात् ॥ २६ ॥ सत्यंह्यवय
वःप्रोक्तःसर्वावयविनामिह ॥ विनार्थेनप्रतीयेरन्पटस्यैवांशतंतवः ॥ २७ ॥ ॥ ॥

त्त्वादित्यस्यहेतोरसिद्धिमाशंक्य ॥ सावयवत्वेनसाधयति ॥ यथेति ॥ अवयवीति ॥ यत्सावयवंतदाद्यंतवत् ॥
घटादिवदित्यर्थः ॥ अतउदयाप्ययात् ॥ आद्यंतवद्धिविश्वंसंभवतीत्यर्थः ॥ यद्वापृथगेवागमापायित्वाद्धिविश्वं
मिथ्याब्रह्मतुनतदवधित्वात् ॥ सत्यमित्यनेनसाध्यतेदृष्टान्तस्तुपूर्वोक्तएव ॥ यथाजलधराव्योम्नीति ॥ दृष्टान्तस्त्वा
गमापायिनस्तदवधित्वमात्रेणतुमिथ्यात्वेइति ॥ २६ ॥ अन्यतमाहृतादितिप्रतिज्ञातंकारणस्यसत्यत्वमुपपाद
यति ॥ सत्यंहीति ॥ अवयवःकारणंप्रोक्तः ॥ वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यंइत्यादिश्रुति
भिः ॥ अत्रयुक्तिमपिदर्शयति ॥ विनेतिनिश्रंगहेराजव ॥ हियस्मादर्थेन ॥ अवयविनापृथगभावयवाःप्रती
येरन् ॥ २७ ॥ ॥

ननु कार्याभावे कारणत्वं ब्रह्मणः कुतो नेत्यत आह ॥ सत्यं न द्विना नीवसत्त्वमित्याह ॥ यदिति ॥ सामान्यं कारणं विशेषः कार्यं तद्रूपेण भ्रान्त्या न्यायाश्रयात् परस्परानपेक्षत्वेन निरूपणमहत्वादित्यर्थः ॥ अतः कारणत्वमवधित्वं व्यापकत्वमित्यादिकमपि परस्परापेक्षत्वात् अध्यस्तत्वात् तत्त्वतो नास्त्येव वस्तुत इत्यर्थः ॥ यद्वा तत्रैव हेत्वंतरमेतत् ॥ यदुपलम्भेन संभ्रमः सामान्यविशेषरूपत्वात् स्वप्नवत् ॥ अन्योन्यापाश्रयत्वात् ॥ इतीदमपि हेत्वंतरं ॥ गुणगुणिविशेषणविशेष्यव्याप्यव्यापकत्वादिरूपेण परस्पराधीनसिद्धत्वात् तथाभूतवदिति निर्गमनं अन्योन्याश्रयाद्येतद्वत्तत्त्वमेव तत्त्विति ॥ २५ ॥ नदेवमनेकैर्हेतुभिः प्रपंचस्यासत्त्वं प्रसाधितं ॥ तत्र शंका ॥ ननु प्रपंचस्यापि प्रकाशमानत्वात् ॥ आत्मवत्सत्त्वं किं न स्यादिति ॥ तत्राह ॥ विकारा इति ख्यायमानः प्रकाशमानोपि विका

यत्सामान्यविशेषाभ्यामुपलम्भेन संभ्रमः ॥ अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तु यत् ॥ २५ ॥ विकारः ख्यायमानोपि प्रत्यगात्मानमंतरा ॥ न निरूप्यः स्फुटोपि स्यादेवं चित्सममात्मवत् ॥ २६ ॥ नहि सत्यस्य नानात्वमविद्वान्यदि मन्यते ॥ नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव ॥ २ ॥

रः प्रपंचः प्रत्यगात्मप्रकाशं विना, एतमात्रोपि न निरूप्यो ऽस्ति तं विना निरूप्यः स्यात् स्वेन न हि सोपि चित्समः स्यात् चिद्रूपेणात्मना समः स्वप्रकाशो भवेत् ॥ तथा च सति सोप्यात्मवत्स्यात् एकरूपः स्यादित्यर्थः ॥ २६ ॥ कुत इत्यत आह नहीति ननु सत्यस्याप्यात्मनो जीवब्रह्मरूपं नानात्वमस्त्येव तत्राह ॥ यद्येवं नानात्वं मन्यते ॥ तर्ह्यविद्वान् कथं तर्हि तयोर्भेदव्यवहारः ॥ उपाधिकृत इत्याह ॥ नानात्वमिति ॥ तत्र छिद्रयोः घटाकाशमहाकाशयोरिवेति ॥ परिच्छेदः परिच्छेदे दृष्टांतः ज्योतिषोः घटाकाशजलस्थसूर्ययोरिवेत्युपाधिकृतविकारः सदसद्भावे वातयोर्बाह्यशरीरस्थवाय्वोरिवेति क्रियाभेदं ब्रह्मणएव प्रपंचस्यवहातलं वनत्वं दृष्टांतेन स्पष्टयति ॥ यद्येति ॥ ३० ॥ ॥

क्रियाभिः नानाद्रव्यनामभेदैः बहुधा कटककुंडलमालातुलाकोट्यादिरूपेण लौकिकवैदिकैर्वचोभिर्जनैरहंका
रोपहितैः ॥३०॥ नन्वहंकारस्यैकत्वं ब्रह्मस्वरूपावरणेन भेदव्यवहारहेतुत्वं न स्यात्तस्य कारणभूतब्रह्मावारकत्वा
संभवात् ॥ आवरणेवास्य स्वाश्रयप्रकाशासंभवादित्याशंक्य सदृष्टांतमाह ॥ यथेति ॥ अर्करश्मय एव मेघ
रूपेण परिणता बध्नंति ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः ॥
प्रजा इत्यादिवचनात् ॥ तस्मादर्कप्रभवः अर्केणैव दर्शितः ॥ प्रकाशितश्च तमः स्वरूपभूतार्कदर्शनप्र

यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ॥ एवं वचोभिर्भगवानधो
क्षजो व्याख्यायते लौकिकवैदिकैर्जनैः ॥३१॥ यथा घनोर्कप्रभवोर्कदर्शितो ह्यर्कांशभू
तस्य च चक्षुषस्तमः ॥ एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंधनः ॥३२॥
घनो यदार्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा ॥ यदा ह्यहंकार उपाधिरात्मनो जि
ज्ञासया नश्यति तर्ह्यनुस्मरेत् ॥३३॥ यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबंध
नं ॥ छित्त्वाच्युतात्मानुभवोवतिष्ठते तमाहुरात्यंतिकमंग संप्लवम् ॥३४॥ नित्यदा सर्वभू
तानां ब्रह्मादीनां परंतप ॥ उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥३५॥ ॥ ॥

॥ श्रीरामाय नमः ॥ ॥ श्रीकृष्णाय नमः ॥

तिबंधको भवति ॥ अहं अहंकारः ब्रह्मगुणः ॥ ब्रह्मकार्यभूतः ॥ तदीक्षितस्तेनैव प्रकाशितश्च ॥ आत्मनो
जीवस्यात्मबंधनः ब्रह्मस्वरूपदर्शनप्रतिबंधको भवति ॥३२॥ अत एवाहंकारनाशे स्वरूपदर्शनं भवती
ति ॥ सदृष्टांतमेवाह ॥ घन इति ॥ आत्मन उपाधिजिज्ञासया विचारेण नश्यति तदा अनुस्मरेत् ॥ शुद्धं ब्रह्माह
मिति प्रपश्यतीत्यर्थः ॥३३॥ सोयमात्यंतिकः प्रलयः इत्युपसंहरति यदैवमिति विवेकहेतिना ज्ञानशस्त्रे
ण अहंकरणमेवात्मबंधनं तच्छित्त्वा अच्युतं परिपूर्णं आत्मानुभवतीति तत्स्था ॥३४॥ नित्यप्रलयमाह नित्यदेति
नमं ॥३५॥

श्री· भा·द्वा· टी· १२

कुतइत्यतआह ॥ कालइति ॥ परिणामिनां नदीप्रवाहप्रदीपज्वालादीनां याअवस्थानीचावस्थास्ताः कालरूपपर
स्रोतःस्रोतसो वेगेनाशु ह्रियमाणस्य देहादेर्दृश्यमानाः तद्वदेव नित्यदा जन्मप्रलयहेतवो भवन्तीति ॥ ३५ ॥
देहः प्रतिक्षणं प्रध्वंसी प्रतिक्षणमवस्थाभेदस्य विद्यमानत्वात् प्रदीपादिवद्दिश्यमानं ॥ यदि प्रतिक्षण
मवस्था भवन्ति तर्हि किं न दृश्यन्ते ॥ तत्र हेतुरसिद्ध इत्याशंक्याह ॥ अनाद्यन्तवता कालेन जायमाना अवस्था
नैव लक्ष्यन्ते ॥ आकाशे गच्छतां ज्योतिषां चन्द्रादीनां गमनागमनावस्थाविशेषा नैव लक्ष्यन्ते तद्वत् ॥ अतोय
थातेषां प्रदेशान्तरप्राप्त्या प्रतिक्षणं गत्यवस्थाः कल्प्यन्ते तद्वद्देहेऽपि बाल्यतारुण्यादिदर्शनेन मध्यवर्ति

कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा ॥ परिणामिनामवस्थास्ता जन्मप्रलयहेत
वः ॥ ३५ ॥ अनाद्यन्तवतानेन कालेनेश्वरमूर्तिना ॥ अवस्था नैव दृश्यन्ते वियति ज्योतिषा
मिव ॥ ३६ ॥ नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः ॥ आत्यन्तिकश्च कथितः काल
स्य गतिरीदृशी ॥ ३७ ॥ एताः कुरुश्रेष्ठ जगद्विधातुर्नारायणस्याखिलसत्त्वधाम्नः ॥ ली
लाकथास्ते कथिताः समासतः कार्त्स्न्येन नाजोऽप्यभिधातुमीशः ॥ ३८ ॥ संसारसिन्धुम
तिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ॥ लीलाकथारसनिषेवणमं
तरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ॥ ३९ ॥

न्योवस्थाः कल्प्यन्त इति न हेतुरसिद्ध इत्यर्थः ॥ ३६ ॥ उपसंहरति नित्य इति पुराणार्थमुपसंहरति ॥ एता इ
ति ॥ ३७ ॥ लीलाविषयाः कथाः अजो ब्रह्मापि कार्त्स्न्येनाभिधातुं नेशः ॥ ३८ ॥ ननु यदि साकल्येनाभिधातुं
न शक्यते तर्हि किं तदभिधानेन तत्राह संसारेति विविधदुःखमेव दवो दावानलः तेनार्दितस्य पीडितस्य
अतितर्तुमिच्छोः पुंसः श्रीभगवतो याः लीलास्तासां कथास्तासां रसः तन्निषेवणमन्तरेणान्यः प्लवः
उत्तरणसाधनं न भवेत् ॥ उपायान्तरासंभवात् ॥ तत्कथाश्रवणमेव यथाशक्ति निषेव्यमित्यर्थः ॥ ३९ ॥

[illegible]
२३

श्रोतव्यादरदेवौख्यायसंप्रदायप्रवृत्तिमाह ॥ पुराणसंहितामितित्रिभिः ॥४०॥ स वै बादरायणः प्रीतः सन् इमां संहितां प्राहे
ति पूर्वेणान्वयः ॥४१॥ असौ सूत इति परतः स्थितिनिर्दिष्टाह ॥ नैमिषालये नैमिषारण्यस्थाने ॥४३॥ इति श्रीभावार्थदी
पिकायां द्वादशस्कंधे चतुर्थोध्यायः ॥४॥ पंचमे तु समासेन परब्रह्मपदेशतः । राज्ञस्तक्षकसंदेशोन्मृत्युभीतिनिवारणं
एतत्पुराणश्रवणेन मयं प्राप्नोतीत्यभिप्रीतिपुराणार्थमनुस्मारयति ॥ अत्रेति ॥ अयं भावः जगतः कर्ता ब्रह्मापिय

पुराणसंहितामेतामृषिर्नारायणोव्ययः ॥ नारदाय पुरा प्राह कृष्णद्वैपायनाय सः ॥४०॥ स वै मह्यं महा
राज भगवान्बादरायणः ॥ इमां भागवतीं प्रीतः संहितां वेदसंमितां ॥४१॥ एतां वक्ष्यत्यसौ सूत ऋषिभ्यो नै
मिषालये ॥ दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः शौनकादिभिः ॥४२॥ इति श्रीभागवते द्वादशस्कंधे परमार्थनि
र्णयो नाम चतुर्थोध्यायः ॥४॥ श्रीशुक उवाच ॥ अत्रानुवर्ण्यतेभीक्ष्णं विश्वात्मा भगवान्हरिः ॥ यस्य प्र
सादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ॥१॥ त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि ॥ न जातः प्रागभूतोद्य देहव
त्त्वं न नंक्ष्यसि ॥२॥ राम ॥ ॥ ॥ राम ॥ ॥ ॥ राम ॥ ॥

यस्य प्रसादजः ॥ प्रसादो रजोवृत्तिर्हर्षः ततो जातस्तान्नत्परतंत्रः ॥ सर्वसंहर्ता रुद्रश्च यस्य क्रोधसंभवो न स्वतंत्रः ॥ स
विश्वात्मा भगवानत्रानुवर्ण्यते अत एवंभूतं श्रीभगवंतं स्मर एव ततः कुतोन्यस्माद्भयशंकेति ॥१॥ त्वं पुनः कृतार्थ एवे
त्यनुस्मारयति पशुबुद्धिमविवेकं यस्मान्न नंक्ष्यसि ॥ कुत इत्यत आह ॥ न जात इति ॥ यथा देहः ॥ प्रागभूत एवाद्य जातो
नंक्ष्यति न तथैव त्वं पूर्वं नाभूः न वाद्य जातोसि अतो न नंक्ष्यसि ॥२॥ श्रीरामाय नमः ॥ ॥ ॥ ॥

श्री॰
भा॰ द्वा॰
टी॰
१४

ननु बीजांकुरवत्तस्वस्मात्पुत्ररूपेण स्वयमेव भवति ॥ यथाहुः श्रुतिः ॥ ततः पुनरंकुरवान् ॥ द्वीज मिव पौत्रादि रूपेणा
पि स्वयमेव भवसि ॥ पिता पुत्रेण पितृमान्योनि योनाविति श्रुतेः ॥ अत स्त्वं पुनरुत्पत्स्य कथं न स्यामीति चेत् ॥ तत्राह
न भविष्यसि तिभूत्वा पुत्रपौत्रादि रूपवान् बीजांकुरवन्न भविष्यसि ॥ यस्माद्देहादेर्व्यतिरिक्तस्त्वं यथानलः काष्ठा
त् देहाद्देहो जायते नात्मेति भावः ॥ ३ ॥ जन्मादीनां देहधर्मत्वं दृष्टांतेन प्रपंचयति ॥ स्वप्ने यथात्मनः शिरश्छेदं स्वयं
पश्यति ॥ एवं जागरणेपि यस्माद्देहस्य पंचत्वादिकं पश्यति ततस्तद्देवात्मन इदं भ्रममात्रं वस्तुतः त्वात्मा जोमरश्च त्व

न भविष्यसि भूत्वा त्वं पुत्रपौत्रादि रूपवान् ॥ बीजांकुरवद्देहादेर्व्यतिरिक्तो यथानलः ॥ ३ ॥ स्वप्ने यथा
शिरश्छेदं पंचत्वाद्यात्मनः स्वयं ॥ यस्मात्पश्यति देहस्य तत आत्मा ह्यजोमरः ॥ ४ ॥ घटे भिन्ने यथाकाश
आकाशः स्याद्यथा पुरा ॥ एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ॥ ५ ॥ मनः सृजति वै देहान्गुणान्क
र्माणि चात्मनः ॥ तन्मनः सृजते माया ततो जीवस्य संसृतिः ॥ ६ ॥ नमो नारायणाय नमः ॥ ॥

र्थः ॥ तदुक्तं ॥ आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ ॥ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षण इति ॥ ४ ॥ त
स्माद्देहोपाधिकोयमात्मनो जन्मादिसंसारभ्रमः ॥ तस्मादुपाधिनिवृत्तौ मुच्यत इति सदृष्टांतमाह घट इति ॥ य
था पुरा घटोपाधेः पूर्वमिव पुनर्घटे भिन्ने तदंतर्वर्त्येव काश आकाश एव स्याद्यथा ॥ एवं देहे मृते तत्त्वज्ञानेन
लीने सति ॥ ५ ॥ ज्ञानेन लयं संभावितं मायाकृतमात्मनो देहाद्युपाधिसंबंधप्रकारमाह ॥ मन इति ॥ मन आ

सर्गादिद्वादशीव ॥ सृजति ॥ तत्कर्मतो लिंगमायाम्यजनित
तो मायापुरुषाणि समुद्भाव्यानि ॥ ८

ग्रा॰ सं॰
१४

एतदेव स्पष्टं तमाह स्वार्थेन ॥ स्नेहेनेति ॥ दीपस्य ज्योतिषो दीपत्वं ज्वालारूपः परिणामः ॥ तत्र तैलस्थानीयं कर्म तद
धिष्ठानस्थानीयं मनः ॥ वर्त्तिस्थानीयो देहः ॥ अग्निसंयोगस्थानीया आत्माद्दीपस्थानीयः संसारः ॥ इति योऽन्यदेहस्थ
तः देह इति बंधनः य ह्यदेहश्तो मनसोन चात्मनः ॥ ७ ॥ अतो दीपवत्संसार एवं न पश्यति नत्वात्मज्योतिर्वेदित्याह ॥ नेतिन
ततत्र प्रतीयमान आत्माऽतस्तत्पत आह ॥ य इति व्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेहयोः परः अन्यः यतः स्वयंज्योति ॥ प
रत्वं प्रपंचयति ॥ आकाशवदिति ॥ आधारो देहादेः प्रपंचस्य ध्रुवो निर्विकारैः ॥ नास्यंतउपमा वयस्यसोनंतोपमः ततो

स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ॥ ततो दीपस्य दीपत्वमेवं देहकृतो भवः ॥ ७ ॥ रजःसत्त्वतमो
ह्याजायते पश्यति न पश्यति ॥ ७ ॥ नतत्रात्मा स्वयंज्योतिर्यो व्यक्ताव्यक्तयोः परं ॥ आकाशवच्चाधारो ध्रु
वोनंतोपमस्ततः ॥ ८ ॥ एवमात्मानमात्मस्थमात्मनैवामृश प्रभो ॥ बुद्ध्यानुमानगर्भिण्या वाक्यदेवानु
चिंतया ॥ ९ ॥ चोदितो विप्रवाक्येन नत्वां धक्ष्यति तक्षकः ॥ मृत्यवो नोपधक्ष्यंति मृत्यूनां मृत्युमीश्वरं
अहं ब्रह्म परं धाम ब्रह्माहं परमं पदं ॥ एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले ॥ ११ ॥ दशंतं तक्षकं
ले पादे लेलिहानं विषाननैः ॥ न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः ॥ १२ ॥ ॥ ॥ ॥ ॥

विभुः ॥ अत स्तमेव चिंतयेत्याह ॥ एवमनैः मिति ॥ आत्मस्थं देहाद्युपाधिस्थितं ॥ आमृष विचारय ॥ अनुमानगर्भिण्या द
ष्ट्रद्रष्टृपानुयव्यतिरेकतत्त्वयुक्तया ॥ ९ ॥ एवं च सति तक्षको नदहेत् ॥ इत्याह चोदितइति तत्र हेतवः मृत्यव इति मृत्यु हे
तवः ॥ १० ॥ विमर्षप्रकारं दर्शयन् ॥ तत्त्वकादर्शनं दर्शयति ॥ द्वाभ्यां श्लोकाभ्यां योऽहं स ब्रह्मैव यद्ब्रह्म तदहमेवेति
समीक्ष्य ॥ तत्राहं ब्रह्मेति भावनया जीवस्य शोकादिनिवृत्तिः ॥ ब्रह्माहमिति भावनया च ब्रह्मणः पारोक्ष्यनिवृ
त्तिर्भवति इति व्यतिवहारोऽदर्शितः ॥ निष्कले निरुपाधौ आत्मनि ब्रह्मणि ॥ ११ ॥ विषयुक्तैराननैः दर्शनं ग्रसंतं तक्ष

कालेलिहानं सर्पं च ह्यालेलिहानं निकामिशोषप्राप्तमनु निःपोषमाखा
रयंतं आत्मनः पृथक् ॥ १४ ॥

श्रीहरेश्चेष्टामात्मानं त्वं यत्पृष्टवान्॥ तदेव तत्ते कथितं शिष्यसकलार्थतापरीक्षणाय पृच्छति किमिति॥१२॥ द्वाद
शे पंचमः॥५॥ षष्ठे परीक्षितो मोक्षः सर्पहोमादितस्ततः॥ वेदशाखाविभागोक्तिर्वेदव्यासवर्णनं॥ एतत् श्री
मत् श्रीभागवतं नाम पुराणं निशम्य निखिलात्मसु श्रीहरिं पश्यतीति निखिलं चात्मनि पश्यतीति तथा तेन अतः
समेन तेन नतेन मूर्ध्ना तत्पादतलमुपसृत्य तत्पादौ शिरसि निधायेत्यर्थः॥१॥ सिद्धः कृतार्थोऽस्मि यतः अनुगृ

एतत्ते कथितं तात यथात्मा पृष्टवान्नृप॥ हरेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि॥१२॥ इति श्रीद्वाद
शस्कंधे पंचमोऽध्यायः॥५॥ सूत उवाच॥ एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा
समेन तत्पादमूलमुपसृत्य नतेन मूर्ध्ना बद्धांजलिस्तमिदमाह स विष्णुरातः॥१॥ राजोवाच॥ सिद्धोऽस्म्य
नुगृहीतोऽस्मि भवता करुणात्मना॥ श्रावितो यच्च मे साक्षादनादिनिधनो हरिः॥२॥ नात्यद्भुतमहं
मन्ये महतामच्युतात्मनां॥ अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः॥३॥ पुराणसंहितामेतामश्रौष्म भवतो
वयं॥ यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते॥४॥ भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहं॥ प्रवि
ष्टो ब्रह्म निर्वाणमभयं दर्शितं त्वया॥५॥ अनुजानीहि मां ब्रह्मन्वाचं यच्छाम्यधोक्षजे॥ मुक्तकामाशयं चे

हीतोऽस्मि॥ अनुग्रहमेवाह॥ यद्यस्मात् श्रावितः प्राज्ञात्मा मिमापनं च॥२॥ अश्रौष्म अश्रुतवन्तः भवतः सकाशात्॥४॥ सि
द्धोऽस्मीत्युक्तं तदेवाविष्करोति॥ हे भगवन्निति यतस्त्वया दर्शितं ब्रह्म प्रविष्टः॥ कथंभूतम् अभयं यतो निर्वाणं वै कल्परूपं
५॥ किं भूयः श्रोतुमिच्छसीति यदुक्तं तत्र तत्राह॥ न किंचित् श्रोतुमिच्छामि केवलमनुजानीहीति वाचं यच्छामि उपल
क्षणं सर्वेन्द्रियाणां वाचं नियम्य किं करिष्यसीति तत्राह॥ मुक्तकामाशयाः यस्य तत्त्वं नाथेन तत्त्वेन॥ अपोद्भुते प्रवेशया

ननु किं प्राणोत्यागे न किं विकालं ज्ञानतिष्ठो भवेन्निवेनशाह ॥ ध्यानेनेति ॥ चकारात्संस्कारांश्च ततस्तत्क्षणे पथे वेत्यज्ञा
हं भवतेति ॥ ७ ॥ आत्मनात्र आत्मात्मानं मनः ॥ आत्मनि प्रत्यक् स्वरूपे समाधाय श्रीपरमात्मानं दध्यौ अस्पन्दासुः लीन
प्राणः निश्चेष्टः यथा तरुस्थाणुः ॥ ८ ॥ तमेव विप्रो न्यविशत् प्राक्कूले प्रागग्रैर्बर्हिषि दर्भे ॥ ९ ॥ नरदेवं ब्रह्मभूते तस्मिन्
तत्कालमनादिकं पिशुपेक्षणमिवाभवदिति दर्शयति ॥ तत्तक इति त्रिभिः हे विप्राः ॥ १० ॥ तं विषविकिल्बयाप

यज्ज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया ॥ भवता दर्शितं क्षेमं परं भगवतः पदं ॥ ७ ॥ सूत उ० ॥ इत्युक्तस्तम
नुज्ञाप्य भगवान्बादरायणिः ॥ जगाम भिक्षुभिः साकं नरदेवेन पूजितः ॥ ८ ॥ परीक्षिदपि राजर्षिरात्म
न्यात्मानमात्मना ॥ समाधाय परं दध्यावस्पन्दासुर्यथा तरुः ॥ ९ ॥ प्राक्कूले बर्हिष्यासीनो गंगाकूले उद
ङ्मुखः ॥ ब्रह्मभूतो महायोगी निःसंगश्छिन्नसंशयः ॥ १० ॥ तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना
हंतुकामो नृपं गच्छन्ददर्श पथि कश्यपं ॥ ११ ॥ तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणं ॥ द्विजरूपप्र
तिच्छन्नः कामरूपोदशन्नृपं ॥ १२ ॥ ब्रह्मभूतस्य राजर्षेर्देहो हिगरलाग्निना ॥ बभूव भस्मसात्सद्यः पश्य
तां सर्वदेहिनां ॥ १३ ॥ हाहाकारो महानासीद्भुवि खे दिक्षु सर्वतः ॥ विस्मिता ह्यभवन्सर्वे देवासुरना
रादयः ॥ १४ ॥ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः ॥ ववृषुः पुष्पवर्षाणि विबुधाः साधुवादिनः ॥ १५ ॥

रीक्षिद्दक्षिणेन द्रव्याजेनायाग्रहं तं तत्र स्थालीद्रवद्धृतस्य भस्मभूतस्य पुनरंकुरादिक्रमेणोत्थापनाद्विषहा
पं रिणं तद्रूपेदितद्रविणैर्धनैः ॥ संतर्पिततो निवर्त्य द्विजरूपेण तिरोहितः सन्नुग्रदष्टवान् ॥ ११ ॥ तच्च प्रच्छन्नरूपमिव जातं
इत्याह ब्रह्मभूतस्येति ॥ १२ ॥ तत्र लक्षणं ॥ सर्वेषां ॥ दुःखे च ॥ ततः परमतत्त्वमाह द्वाभ्यां हाहाकार इति ॥ १३ ॥ १४ ॥ १५

प्रासंगिकमाह॥ जनमेजय इत्यादि सर्पाभिचारसत्रे द्विजैः सह वर्तमानः यथावदाजुहावेति वा सर्वा वाहनेकारणमा
हू संक्रुद्ध इति॥ १६॥ कस्मान्न तक्षको न दह्येत ते त्वक्काः॥ तं ततो द्विजाः ह्य ऊचुः तमिति॥ १८॥ अथ विजः प्रति प्राह महेंद्र इंद्रसहितः
किमिति न पात्यते॥ २०॥ राज्ञो वाचः श्रुत्वा आजुहुः॥ सा देपमाकानं दर्शयति॥ तक्षकेति इहाग्नौ आशु पत मरुत्वता।

जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितं॥ यथाजुहाव संक्रुद्धो नागान्सत्रे सह द्विजैः॥ १६॥ सर्पसत्रे स
मिद्धाग्नौ दह्यमानान्महोरगान्॥ दृष्ट्वेन्द्रं भयसंविग्नः तक्षकः शरणं ययौ॥ १७॥ अपश्यंस्तक्षकं तत्र राजा पा
रीक्षितो द्विजान्॥ उवाच तक्षकः कस्मान्न दह्येतोरगाधमः॥ १८॥ तं गोपायति राजेंद्र शक्रः शरणमागत
तेन संस्तंभितः सर्पस्तस्मान्नाग्नौ पतत्यसौ॥ १९॥ पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः॥ सहेंद्रस्तक्ष
को विप्रा नाग्नौ किमिति पात्यते॥ २०॥ तच्छ्रुत्वाजुहुवुः विप्राः सहेंद्रं तक्षकं मखे॥ तक्षकाशु पतस्वेह सहें तेः
द्रेण मरुत्वता॥ २१॥ इति ब्रह्मोदिताक्षेपैः स्थानादिंद्रः प्रचालितः बभूव संभ्रांतमतिः सविमानः सतक्ष
कः॥ २२॥ तं पतंतं विमानेन सह तक्षकमंबरात्॥ विलोक्यांगिरसः प्राह राजानं तं बृहस्पतिः॥ २३॥ नैव
त्वया मनुष्येंद्र वधमर्हति सर्पराट्॥ अनेन पीतममृतमथ वा अजरामरः॥ २४॥ जीवितं मरणं जंतोर्गतिः
स्वेनैव कर्मणा॥ राजंस्ततोऽन्यो नान्यस्य प्रदाता सुखदुःखयोः॥ २५ ॥ ॥ ॥ ॥

इंद्रेण सह॥ २१॥ ब्राह्मणोक्तैराक्षेपैः परुषवाक्यैः सतक्षकः॥ २२॥ भवत्वनामा अजरामरः॥ तथापि पितृमारकं दहस्यामी
ति चेत्तत्राह॥ जीवितमिति॥ गतिः परलोकः॥ अतो दुर्मरणनिमित्तापि दुर्गतिरनेकहेतुत्वात् पितुर्न शोचनीयमित्यर्थः॥

कथमन्यः स खलु दुःखप्रदाता नास्ति सर्पादीनां स्वपलभ्यमानत्वादिति चेत्तत्राह ॥ सर्पादिना जंतुः पंचत्वं मृत्युमृच्छ
ति ॥ प्राप्नोतीति यत् ॥ तदा स्वकं कर्मैव भुंक्ते ॥ स्वकर्मप्रयुक्ता एव सर्पादयो न स्वतंत्रा इति भावः ॥ २६ ॥ मंत्री येन त्व
मा त्वमां मामभिचारिकं हिंसाफलं दिष्टं प्राचीनं कर्म ॥ अतः सर्पानुद्दिश्य प्रयुक्तः स्वतंत्रा अप्ययं नापराध इति भावः
वा कुपितं कुरुष्वेति ॥ २८ ॥ ननु कथं विडंबाप्यैवं संमोहः ॥ यतः ब्रह्मकोपात्सर्गीत्तितो मत्कुजं न मे जयकोपात्सर्पो

सर्पचौराग्निविद्युद्भ्यः स्वस्त्राप्यादिभिर्नृप ॥ पंचत्वमृच्छते जंतुर्भुंक्ते प्रारब्धकमेतत् ॥ २६ ॥ तस्मा
त्त्वमिमं राजन्मंत्री येताभिचारिकं ॥ सर्पो ह्यनागसो दष्टानेनैर्दिष्टं हि भुज्यते ॥ २७ ॥ इत्युक्तः स
तथेत्याह महर्षे मानयन्वचः ॥ सर्पसत्रादुपरतः पूजयामास वाक्पतिं ॥ २८ ॥ सैषा विलोपहा मा
यावाधयालक्षणायया ॥ मुह्यंत्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः ॥ २९ ॥ ॥ ॥ ॥

ता मित्यादि ॥ तत्राह सैषेति ॥ तया महत्त्वं दर्शयति ॥ अलक्षणा न लक्ष्यते इति लक्षणा स्वप्रतर्क्या इत्यर्थः ॥ अमो
के त्यत आह ॥ यस्यास्य स्त्री विलोरेव ॥ आत्मभूताः ॥ आत्मांशभूताः ॥ प्राणिनः गुणवृत्तिभिः क्रोधादिभिः भूते
षु देहेषु मुह्यंति ॥ वाध्यबाधकतां व्रजंतीत्यर्थः ॥ ननु श्रवणादिना बाधितया तया कृतो मोहः स्यात् ॥ तत्राह

[illegible] ॥ २८

कथं तर्हि माया॥ तत्कर्मनिवृत्तिरित्याशंक्य॥ श्रीविष्णुस्वरूपनिरूपणपूर्वकं तद्भावनातः॥ सर्वानर्थनिवृत्तिरिति
मुमुक्षार्थमुपसंहरति॥ न यत्रेति पंचभिः॥ दंभीति मायाकपटवानयं पुमानित्येवंभूता यां उद्भावसकृदुल्लिख्यमाना
या माययेत्यर्थः॥ सा मायात्मवादे क्रियमाणे आत्मवादिभिर्यत्राभया न विराजिता न प्रकाशिता॥ किंत्वभीतेव सकार्ये
विहर्त्तं तरतीति प्रतिपादितेत्यर्थः॥ तदुक्तं॥ तस्मै नमो भगवते वासुदेवाय धीमहि॥ यन्मायया दुर्जयया मां ब्रुवंति जगद्गु
रुं॥ विलज्जमानया यस्य स्थातुमीक्षापथेमुया॥ विमोहिता विकत्थंते ममाहमिति दुर्धियः इति॥ किंच॥ यद्यस्मात्॥ त

न यत्र दंभीत्यभया विराजिता मायात्मवादे सकृदात्मवादिभिः॥ न यद्विवादो विविधस्तदाश्रयो मनश्च
संकल्पविकल्पवृत्ति यत्॥ ३०॥ न यत्र सृज्यं सृजतोभयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहं॥ तदेतदुत्सा
दितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत्स्वयं मुनिः॥ ३१॥

दाश्रयो मायाश्रयो विविधो विवादोपि नास्ति॥ विशेषविषयत्वाद्विवादानां तस्य च विशेषातीतत्वादिति भावः॥ संक
ल्पविकल्पावृत्तयो यस्य तन्मनोपि यत्र नास्ति॥ संकल्पविकल्पानामपि विशेषविषयत्वात्॥ ३०॥ किंच सृज्यं कर्मसृज
ताकारकवर्गेण॥ सह उभयोः सृज्यसृष्टोः परं साध्यं सात्मं श्रेयः फलमपि॥ असृज्यसृष्टफलैरन्वितो जीवश्चाहंका
रात्मकोपि यत्र नास्ति॥ अत एवं उत्सादितो निरस्तो बाध्यबाधको यस्मिन्॥ तदेव तत्त्वं यदात्मस्वरूपमित्यर्थः तन्निस्थित॥
ऊर्मीनुत्तरंगान्॥ अहंकारादीन्निषिध्य विरमेत्॥ विशेषेण क्रीडेदित्यर्थः॥ ३१॥ राम ॥ ॥ ॥

यतस्तद्धैसर्वं पदमामनंतीत्याह ॥ परमिति यदेतत्तद्विष्णोर्वै सर्वं पदं स्वरूपमामनंति ॥ केऽतत्र आत्मव्यतिरिक्तं उत्सिसृक्षवः ॥ त्यक्तुमिच्छवः यतः ॥ अनन्यसौहृदाः ॥ नास्ति अन्यस्मिन्सौहृदं येषां ते कुतः ॥ दौरात्म्यं देहाद्यहंभावं विसृज्य देहेऽहंकाराभावादन्यत्र सौहृदं नास्ति ॥ अतस्त्यक्तुमिच्छवः इत्यर्थः ॥ कथं नेति नेत्येवं ॥ अत्र विद्वदनुभवमपि प्रमाणयति हृदोपगुह्य ध्यानाविना ॥ ततः समाहितैरवसितं निश्चितं तद्वदायवसितमवबुद्धं ॥ आत्मतयागृहीतमित्यर्थः ॥ २४ ॥

परं पदं वैष्णवमामनंति तन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं समाहितैः ॥ २४ ॥ त एतदधिगच्छंति विष्णोर्यत्परमं पदं ॥ अहं ममेति दौर्जन्यं न येषां देहगेहजं ॥ २५ ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ २६ ॥ ॐ नमो भगवते तस्मै कृष्णायाकुंठमेधसे ॥ यत्पादांबुरुहध्यानात्संहितामध्यगामिमां ॥ २७ ॥ शौनक ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ॥ वेदाश्च कतिधा व्यस्ता एतत्सौम्याभिधेहि नः ॥ २८ ॥ सूत ॥ समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः ॥ हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥ २९ ॥ रामायनमः ॥ ॥

एवं प्रासाववधिकाविलोऽप्युपदिशति ॥ एतदिति ॥ देहजमहमिति ॥ गेहजं ममेति ॥ २५ ॥ प्रासंगिकमुपायमाह ॥ अतिवादानिति ॥ २६ ॥ शास्त्रसमाप्तौ गुरुं प्रणमति नम इति कृष्णाय व्यासाय ॥ अध्यगामधिगतवानस्मि ॥ २७ ॥ इमां संहितामध्यगामित्युक्तं ॥ तत्र पुराणसंहिताविभागं विष्णोर्यतो भक्तस्य वेदविभागमपि प्रसंगात्पृच्छति पैलादिभिरिति हे सौम्य ॥ २८ ॥ तत्र प्रथमं वेदाविर्भावप्रकारमाह ॥ समाहितात्मन इति ॥ अभूत्किं ब्रह्मणो हृदिय आकाशः तस्मान्नादोऽभूत् ॥ यः कर्णपुटपिधाने श्रोत्र

प्रसंगान्नादोपासकानां मोक्षफलमाह ॥ यस्य नादस्योपासनया आत्मनो मलं धूत्वा अपोह्य ॥ कथंभूतं मलं तमाह ॥ द्रव्य-
मधिभूतं क्रिया अध्यात्मं कारकमधिदैवं एवं त्रिधाभूतं आत्मावबोधमेवेति तथा तं ॥ ३८ ॥ त्रिवृत् त्रिमात्रः अं उं मं इत्यादिभिः ॥ अव्यार्थे-
माणात् सोंकारस्यांतरसमाम्नायांतर्भावात् ॥ स्वरूपमतयातं विशिनष्टि अव्यक्तः प्रभवो यस्य सः तदेवाह स्वराट् स्वत एव हृदि
प्रकाशमानः ॥ तमेव कार्येण लक्षयति ॥ यत्तदिति नपुंसकत्वं लिंगशब्दविशेषणत्वात् ॥ लिंगं गमकं ॥ ३९ ॥ कोसौ परमा-
त्मा तमाह ॥ शृणोतीति ॥ इमं स्फोटमव्यक्तमोंकारं मनु जीव एव तं शृणोतु ॥ नेत्याह ॥ सुप्तश्रोत्रे कर्णपिधानादिना श्रु-
तिवृत्तिकेपि श्रोत्रे सति जीवस्य करणाधीनज्ञानत्वात् ॥ न तदा श्रोता ॥ तदुपलब्धिस्तु तस्य परमात्मद्वारिकैवेति भावः ईश्वरस्तु

यदुपासनया ब्रह्मन्योगिनो मलमात्मनः ॥ द्रव्यक्रियाकारकाख्यं धूत्वा यांत्यपुनर्भवं ॥ ३८ ॥ ततोभूत्त्रिवृदोंका-
रो योऽव्यक्तप्रभवः स्वराट् ॥ यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ॥ ३९ ॥ शृणोति य इमं स्फोटं सुप्तश्रोत्रे च
शून्यदृक् ॥ येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥ ४० ॥ स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमा-
त्मनः ॥ स सर्वमंत्रोपनिषद्वेदबीजं सनातनं ॥ ४१ ॥

नैवं यतः स्वस्य रकत्यन्येपींद्रियवर्गे दिग्ज्ञानं यस्य ॥ तथा हि ॥ हृदि यदा शब्दं श्रुत्वा प्रबुध्यते न तदा जीवः ॥ श्रोता किंत्वनीं-
द्रियत्वात् ॥ अतो यः तदा शब्दं श्रुत्वा जीवं प्रबोधयति स एव परमात्मैव तत्त्वत् ॥ कोसौ ओंकारः तं विशिनष्टि सार्धेन ॥ येन वा-
गुरती व्यज्यते ॥ यस्य च हृदाकाशे ॥ आत्मनः सकाशात् ॥ व्यक्तिः अभिव्यक्तिः ॥ ४० ॥ किंच स्वधाम्नः स्वस्याश्रयः ॥ कारणं
यद्ब्रह्म तस्य ॥ किंच परमोत्कृष्टभूतस्य सम्यक्देवतावाचको पीत्याशयेनाह ॥ स इति ॥ सर्वमंत्राणामुपनिषद्रहस्यं स्वरूपमरूप- राम॰
मित्यर्थः तत्र हेतुः ॥ वेदानां पंच कारणं बीजत्वेपि ॥ अविकारितामाह ॥ सनातनं सदेकरूपं तस्य ब्रह्मरूपत्वात् ॥ ४१ ॥ १८

इदानीं ततः सर्वप्रपंचोत्पत्तिप्रकारमाह ॥ तस्य हीति त्रयः त्रिसंख्येयुक्ता भावाः ॥ ये रेकारोकारमकारैः धार्यंते तेन तत्कार-
णत्वात् ॥ तानेवाह गुणाः सत्त्वादयः नामानि ऋग्यजुः सामानि त्रयो भूर्भुवः स्वर्लोकाः वृत्तयो जाग्रदाद्याः ॥ ४४ ॥ तत स्ते-
भ्यो वर्णेभ्यः अक्षराणां समाम्नायं तमाहारं तमेवाह ॥ अंतःस्था यरलवाः ऊष्माणः शषसहाः स्वरा अकाराद्याः स्पर्शाः
कादयः ह्रस्वादीर्घश्चत्यादि शब्दात् जिह्वामूलीयादयः ॥ तदेवं लक्षणं स्वरूपं यस्य तं ॥ ४५ ॥ विभुः व्यक्तत्वस्वरूपो भ-
गवान् ॥ अस्य जनदितिशेषः स वा नृपश्रंगाः ॥ चतुर्होत्रं विश्वं तया चतुर्होत्रोपालक्षिता ऋत्विजः चतुर्होतारः तैर नुष्ठेयंको

तस्मात्स संततयो वर्णा ये आकाराद्या भृगूद्वह ॥ धार्यंते ये स्वयोभावा गुणानामार्थवृत्तयः ॥ ४५ ॥ ततो तर समा-
म्नायमसृजद्भगवानजः ॥ अंतःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं ॥ ४६ ॥ तेनासौ चतुरो वेदांश्चतुर्भिर्व-
दनैर्विभुः ॥ सव्याहृतिकान् सोंकारांश्चातुर्होत्रविवक्षया ॥ ४४ ॥ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोवि-
दान् ॥ ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ ४५ ॥ ते परंपरया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्यु-
गेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥ ४९ ॥ क्षीणायुषः क्षीणसत्त्वान्दुर्मेधान्वीक्ष्य कालतः ॥ वेदान्ब्रह्मर्षयो व्य-
स्यन्हृदिस्थाच्युतनोदिताः ॥ ४७ ॥ अस्मिन्नप्यंतरे ब्रह्मन्भगवांल्लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचि-
तो धर्मगुप्तये ॥ ४८ ॥

त्राधुर्यं वादिकं कर्म चातुर्होत्रं तद्विस्तया ॥ ४४ ॥ पुत्रान्मरीच्यादीन् तांश्च वेदान्ब्रह्मकोविदान् वेदोच्चारणादिति पुत्रा-
न् ॥ ४५ ॥ एवं चतुर्युगेष्वप्राप्ताः द्वापरमादिः ॥ यस्मिन्नंतरे प्रालक्षणस्य कालस्य तस्मिन्द्वापरांते वेदविभागप्रसिद्धेः श्रु-
तत्वसमकालप्राप्ताः चतारप्रसिद्धेश्च व्यस्ता विभक्ताः ॥ ४९ ॥ तत्रहीत्वः क्षीणायुषः जनान्वतहिं पुरुषबुद्धिप्रभवत्वात्
स्वनादरणीयत्वं स्यात् ॥ इत्याशंक्याह हृदिस्थेति ॥ ४७ ॥ एवं सामान्यतो वेदविभागक्रममुक्त्वा वैवस्वतमन्वंतरे विशेष

श्री०
भा० द्वा०
टी०
१९

अंशांशः माया तस्यांशः सत्वं तस्य कलया अंशेनावतीर्णः सन् चातुर्विध्यमेवाह || ऋगिति ऋगादिमंत्राणां राशीन् व
र्गशः || तत्तत्करणभेदैरुद्धृत्य यथानेकविधमिश्राणां राशेः मणिगणाः पद्मरागादयो विविच्य उद्ध्रियंते तद्वदुद्धृत्य तैर्मं
त्रैश्चतस्रः ऋगादिसंहिताश्चक्रे ||५०|| तासां संहितानां मध्ये एकैकां ||५१|| ऋक्संप्रदायरूपां बह्वृचाख्यां निगदाख्यं यजुर्वे

पराशरात्सत्यवत्यामंशांशकलया विभुः || अवतीर्णो महाभाग वेदं चक्रे चतुर्विधं ||४९|| ऋगथर्वयजुः
साम्नां राशीनुद्धृत्य वर्गशः || चतस्रः संहिताश्चक्रे मंत्रैर्मणिगणा इव ||५०|| तासां स चतुरः शिष्यानुपा
हूय महामुनिः एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ||५१|| पैलाय संहितामाद्यां बह्वृचाख्यामुवा
च ह वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणं ||५२|| साम्नां जैमिनये प्राह तथा छंदोगसंहितां || अथ
र्वांगिरसीं नाम स्वशिष्याय सुमंतवे ||५३|| पैलः स्वां संहितामूचे इंद्रप्रमितये मुनिः || बाष्कलाय च सोऽ
प्याह शिष्येभ्यः संहितां स्वकां ||५४|| चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव || पराशरायाग्निमात्रे
इंद्रप्रमितिरात्मवान ||५५|| अध्यापयत्संहितां स्वां मांडूकेयमृषिं कविं || तस्य शिष्यो देवमित्रः सौभर्यादिभ्य
आत्मवान् ||५६||

चेण गद्यमानत्वान्निगदाख्यं ||५२|| छंदःसु गीयमानत्वात् छंदोगाख्यां संहितां ||५३|| तत्र ऋग्वेदशाखाविभाग
माह पैल इति || स्वसंहितां द्विधा विभज्य इंद्रप्रमितये बाष्कलाय चोचे ||५४|| स बाष्कलोपि स्वसंहितां चतुर्धा व्यस्य
बोध्यादिभ्यः चतुर्भ्यः शिष्येभ्य आह || हे भार्गव ||५५|| इंद्रप्रमितिरपि स्वां संहितां सुतं मांडूकेयमध्यापयामास तस्य

मांडूकेयमृषिं कविं तस्य शिष्यो देवमित्रः ||५८||

राम
१९

तत्सुतः मांडूकेयस्ततः शाकल्यो वात्स्यादिषु पंचस्वधात् ॥ तानध्यापयामासेत्यर्थः ॥ ५७ ॥ तच्छिष्यः शाकल्यशिष्यः स्वसं-
हितां त्रिधा विभज्य चतुर्थीं वैदिकपदार्थव्याख्यानरूपं निरुक्तं च कृत्वा बालकादिभ्यः चतुर्भ्यो ददौ ॥ ५८ ॥ बाष्कलिः पूर्वो-
क्तस्य बाष्कलस्य पुत्रः प्रतिशाखाभ्यः उक्तसर्वशाखाभ्यः बालायन्यादयः तामादधुः अधीतवंतः ॥ ५९ ॥ संक्षेपादेवोपसं-
हारपूर्वकं तच्छ्रवणफलमाह ॥ बह्वृचा इति एतच्छंदसां एतेषां छंदसां ॥ ६० ॥ यच्चेरुरिति द्विरीयश्लोकस्तन्निप्रसक्तिमाह ॥ वै-

शाकल्यस्तत्सुतः स्वां तु पंचधा व्यस्य संहितां ॥ वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥ ५७ ॥ जातूक-
र्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहितां ॥ बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ॥ ५८ ॥ बाष्कलिः प्रतिशाखाभ्यो वा-
लखिल्याख्यसंहितां ॥ चक्रे वालायनिर्भिज्यः कासारश्चैव तां दधुः ॥ ५९ ॥ बह्वृचाः संहिता एता एभिर्ब्रह्म-
र्षिभिर्धृताः ॥ श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्रमुच्यते ॥ ६० ॥ वैशंपायनशिष्या वै चरकाध्वर्यवोऽभवन् ॥ यच्चे-
रुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतं ॥ ६१ ॥ याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन्कियत् ॥ चरितेनाल्पसाराणां
चरिष्येऽहं सुदुश्चरं ॥ ६२ ॥ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ॥ विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्वि-
ति ॥ ६३ ॥ देवरातसुतः सोपि छर्दित्वा यजुषां गणं ॥ ततो गतोथ मुनयो ददृशुस्तान्यजुर्गणान् ॥ ६४ ॥ ॥

शंपायनशिष्या इत्यादिना चरकनामनिरुक्तिमाह ॥ यद्यस्माद्ब्रह्महत्यारूपमंहः क्षपयतीति तथा तत्स्वगुरोर्व-
र्तेर्यं व्रतं तच्चरणाच्चरका इत्यर्थः ॥ ६१ ॥ तच्छिष्यः वैशंपायनशिष्यः ॥ अल्पसाराणामेतेषां चरितेन कियत् सुदुश्चरमहं च-
रिष्यामीति ॥ ६२ ॥ विप्राणामवमंत्रा अवज्ञाकर्त्रा मत्तो धीतमाशु त्यजेति ॥ ६३ ॥ देवरातसुतो याज्ञवल्क्यः ॥ ६४ ॥ ॥ ॥

श्री॰
भा॰ द्वा॰
टी॰
२

छेदितस्मादानंविग्रहरूपेणानवहितमिति ॥ तिन्निनाः पदिविशेषणाः भूत्वा आदरुः ततस्तैन्निरीयाइतिप्रसिद्धः सुपेशलाश्रुतिरम्याः बहुवचनेसर्वान्तरभेदविवक्षया ॥ ८५ ॥ का एवमाध्यंदिनादिशाखाप्रसंगमाह ॥ याज्ञवल्क्यइत्यादिना शरीरंवर्णपायनस्यव्यासेनविभज्यभनंक्तानविद्यमानानिमधिश्रविकानिगवेषयन् ॥ मृगयन्नूत्सपतस्थेस्म स्वकृतशावा ॥ ईश्वरवेदानांतयावक्ष्यतिः ॥ ऋग्भिः पूर्वाह्णेदिविदेवईयते यजुर्वेदेनतिष्ठतिमध्येअहः ॥ सामवेदेनोस्तमयेमहीयतेवेदैरशून्यस्त्रिभिरेतिसूर्यइति ॥ ८६ ॥ ॐ नमोभगवते ॥ आदित्यायतवभर्गोयोभवानेकएवमालोकयात्रांश्रवहन्

यज्ञेषितितिराभूत्वातलोल्लपतयाद्रुः ॥ तेनिरीयाइतियजुः शाखाआसन्सुपेशलाः ॥ ८५ ॥ याज्ञवल्क्यस्ततोब्रह्मस्तच्छंदांसिधिगवेषयन् ॥ गुरोरविद्यमानानिसूपतस्थेर्कमीश्वरं ॥ ८६ ॥ याज्ञवल्क्यः ॥ ॐ नमोभगवते आदित्याय अखिलजगतामात्मस्वरूपेणकालस्वरूपेणचचतुर्विधभूतनिकायानांब्रह्मादिस्तंभपर्यंतानामंतर्हृदयेषुबहिरपिवाकाशइवोपाधिनाव्यवधीयमानोभगवानेकएव ॥ क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमांलोकयात्रामनुवहति ॥ ८७ ॥ ॥

तीत्यन्वयः अखिलेषितिहृदयांतर्वर्तित्वेपिजीवतवंतेनोपाधिनाव्यवधीयमानः तदेवदर्शयति अखिलजगतामात्मस्वरूपेणअंतर्हृदयेषुकालस्वरूपेणचबहिरपिवर्तमानइति ॥ अखिलजगतामित्यस्यप्रपंचः ॥ चतुर्विधेतिहृदयांतर्वर्तित्वेपि जीवतवंतेनोपाधिनाअव्यवधीयमानः अनाच्छाद्यमानः ॥ कालस्वरूपेणेत्यस्यप्रपंचः क्षणेतिक्षणलवादयोयेवयवास्तैरुपचिताः संवत्सरास्तेषांगणेनअपामादानेशोषणंविसर्गो वृष्टिस्ताभ्यां ॥ अनेनगायत्रीप्रथम

पदैकविशेषमानसोर्कता ॥ ८७ ॥ रामं

रामः
२

द्वितीयापादार्थोनवर्णनेनस्तौतियद्ब्रह्वेति हे विबुधर्षभ॥ हे सवितः॥ यदण्दो भगवतः तवमंडलं तपति तत्समभिधीम
हि सम्यगामिमुखेनध्यायेमपुनस्तस्यैवसंबोधनं॥ प्रपद्यंतंत्रिपवर्णं च वैदिककर्ममार्गेणस्त्ववतांभक्तानां सान्नविलाति
दुरितानितत्फलानितद्वृजिनानि दुःखानि तेषांबीजमज्ञानं च॥ तेषामवभर्जन॥ विनाप्राकश्रज्ञानं विनाप्राकेमयथः हे तपने
ति॥ ९८॥ ततीयपादेन स्तौतिय इहेति॥ योभवान् स्थावरजंगमसमस्तानां स्वाश्रयाणांजीवानांमनइंद्रियप्राणगणान्
अनात्मनोजगत्॥ स्वयमात्मैवांतर्यामीसन्॥ प्रचोदयतिप्रवर्तयति॥ ९९॥ ततीयपादमेवमंडलस्यपरतयाव्याचष्टाणः

यदुरुत्वावविबुधर्षभसवितस्तत्तपतिअनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिन
बीजावभर्जनंभगवतःसमभिधीमहितपनमंडलं॥ ९८॥ यदिहवावस्थिरचरनिकराणांनिजनिकेतनानांमनइंद्रि
यासुगणाःनमात्मनःस्वयमात्मांतर्यामीप्रचोदयति॥ ९९॥ यएवेमंलोकमतिकरालवदनांदकारसंज्ञाज
गरग्रहगिलितंमृतकमिवविचेतनंअवलोक्यानुकंपयापरमकारुणिकः॥ ईक्षयैवोत्थाप्याहरहरनुसव
नंश्रेयसिस्वधर्माख्यात्मावस्थानेप्रवर्तयतिअवनिपतिरिवासाधूनांभयमुदीरयन्नटति॥ १०॥ परितआशापा
लैस्तत्रतत्रकमलकोशांजलिभिरुपहृतार्हणः॥ ११॥ अथहभगवंस्तवचरणनलिनयुगलंत्रिभुवनगुरुभिः
वंदितमहमयातयाममयजुष्कामउपसरामीति॥ १२॥ ॥ ॥ ॥ ॥ ॥

लौति॥ यएवेतियएकएवभावान्अतिकरालवदनोयोंधकारसंज्ञोजगरग्रहस्तेनगिलितं॥ अत एव मृतकमिवविचेतनंस्व
धर्माख्यंयदात्मावस्थानंप्रत्यकप्रवणत्वंतदेवश्रेयस्तस्मिन् प्रवर्तयतिकिंचयोभवानवनिपतिरिवाटतिगच्छति॥ १०॥ आशाप
पालैरिंद्रादिभिर्दिक्पालैःकमलकोशयुक्तैःतत्तत्स्थैःवांजलिभिःउपहृतार्हणःदत्तार्घः॥ ११॥ यएवंभूतःत्वमथअतःहस्फटं
अयातयामानिअमैर्थयाक्षदविज्ञातानिजक्षितकामोहंउपसरामिभजामि॥ १२॥ ॥ ॥ ॥ ॥

श्री॰ भा॰ द्वा॰ टी॰ २१

एवंस्तवैःप्रसादितस्य॥७३॥ पंचदशशाखायासांशतैरपरिमितैर्यजुर्भिरकरोत्॥ सतैर्विपाटेसयाज्ञवल्क्यात्तैर्यजुर्भिरक
रोदितिजगृहुःअधीतवंतःरविणाश्वरूपेणवाजेभ्यःकेसरेभ्यःवाजेनवेगेनवासन्यस्ताःत्यक्ताःशाखाःवाजसनीसंज्ञास्ता
शाखाइतिवा॥७४॥ सामशाखाविभागमाह॥ जैमिनेरितितितत्सुतःसुमंतसुतःताभ्यांपुत्रपौत्राभ्यांक्रमेणैकैकांप्राह॥७५॥
तच्छिष्योजैमिनिशिष्योमहान्बृहत्तिमेधावीसहस्रसंहितारूपंभेदंचक्रेसाम्नांतत्संहिताभेदंततस्तरोःततः॥७६॥ सुकर्मणःशि
ष्यौकौशल्योहिरण्यनाभःपौष्यंजिर्नामएकःतौजगृहतुः॥ आवंत्यस्त्वन्यःतस्यैवशिष्यःसोपिजग्राह॥७७॥ पौष्यंज्यावंत्य

सूतउवाच॥ एवंस्तुतःसभगवान्वाजिरूपधरोरविः॥ यजूंष्ययातयामानिमुनयेदात्प्रसादितः॥७३॥ यजुर्भिर
करोच्छाखादशपंचशतैर्विभुः॥ जगृहुर्वाजसन्यस्ताःकाण्वमाध्यंदिनादयः॥७४॥ जैमिनेःसामगस्यासीत्सुमं
तुस्तनयोमुनिः॥ सुत्वांस्तुतत्सुतस्ताभ्यामेकैकांप्राहसंहितां॥७५॥ सुकर्माचापितच्छिष्यःसामवेदतरोर्महा
न्॥ सहस्रसंहिताभेदंचक्रेसाम्नांततोद्विजः॥७६॥ हिरण्यनाभःकौशल्यःपौष्यंजिश्चसुकर्मणः॥ शिष्यौज
गृहतुश्चान्यआवंत्योब्रह्मवित्तमः॥७७॥ उदीच्याःसामगाःशिष्याआसन्पंचशतानिवै॥ पौष्यंज्यावंत्ययो
श्चापितांश्चप्राच्यान्प्रचक्षते॥७८॥ लौगाक्षिर्मांगलिःकुल्यःकुसीदःकुक्षिरेवच॥ पौष्यंजिशिष्याजगृहुःसं
हितास्तेशतंशतं॥७९॥ ॥

योरपिचकाराद्धिरण्यनाभस्यापिपंचशतानिशिष्याआसन्॥ तानेतान्वतीःशाखायथायथंजगृहुःतानुदीच्यान्ततःकाल
तःकांश्चित्॥ प्राच्यांश्चप्रवदंतितस्यार्थः॥ यथोक्तेष्वेवसत्त्वे॥ उदीच्याःसामगाःशिष्याःतस्यपंचशतसंख्याताः॥ हिरण्यनाभस्यावं
त्यःसंहितायेर्धिंतोत्तमः॥ गृहीतास्तेपिवोच्यंतेपंडितैःप्राच्यसामगाइति॥७८॥ पुनरप्येतेषांत्रयाणांसुकर्मणःशिष्या
णांशिष्यांतरैःशाखाबाहुल्यंदर्शयतिलौगाक्षिरितिद्वाभ्यां॥७९॥ ॥ ॥ श्रीगणेशायनमः ॥ ॥ ॥ ॥ राम॰ २१

कृतो नाम हिरण्यनाभस्य शिष्यः ॥ स्वशिष्येभ्य ऊचे ॥ शेषाश्चान्याश्चापि प्रसिद्धाः शालोत्रः नाम्नावन्त्यः स्वशि
ष्येभ्य ऊचे ॥ ८० ॥ इति श्रीभागवते भावार्थदीपिकायां टीकायां द्वादशस्कंधे षष्ठः ॥ ६ ॥ सप्तमेऽथर्ववेदविस्तारः पुराणलक्षणं तथा ॥
पुराणलक्षणादीनि फलं भागवतस्य कीर्त्यते ॥ क्रमप्राप्तमथर्ववेदविभागमाह शिष्यं कबंधनामानं स्वकां स्वकीयां
संहितां सोऽपि शिष्योऽपि तां द्विधा विभज्य ॥ तदुक्तं वैस्तवे ॥ अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः ॥ शिष्यम
ध्यापयामास कबंधं सोऽपि तं द्विधा ॥ कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवानिति ॥ १ ॥ तत्र वेददर्शः

कृतो हिरण्यनाभस्य चतुर्विंशति संहिताः ॥ शिष्यानूचे स्वशिष्येभ्यः शेषा आवन्त्य आ
त्मवान् ॥ ८० ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे षष्ठोऽध्यायः ॥ ६ ॥ सूत उवाच ॥ अ
थर्ववित्सुमन्तुश्च शिष्यमध्यापयत्स्वकाम् ॥ संहितां सोऽपि पथ्याय वेददर्शाय चोक्तवा
न् ॥ १ ॥ शौल्कायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः ॥ वेददर्शस्य शिष्यास्ते पथ्यशि
ष्यानथो शृणु ॥ २ ॥ कुमुदः शुनको ब्रह्मन् जाजलिश्चाप्यथर्ववित् ॥ ३ ॥ बभ्रुः शिष्योऽथां
गिरसः सैंधवायन एव च ॥ अधीयेतां संहिते द्वे सावर्णाद्यास्तथापरे ॥ ४ ॥ त्रय्यारुणिः क
श्यपश्च सावर्णिरकृतव्रणः ॥ शांशपायनहारीतौ षड्वै पौराणिका इमे ॥ ५ ॥ अधीयंत व्
यासशिष्यात्संहितां मत्पितुर्मुखात् ॥ एकैकामहमेतेषां शिष्यः सर्वाः समध्यगां ॥ ६

स्वसंहितां चतुर्धा विभज्य चतुरः ॥ शिष्यानध्यापयामास ॥ पथ्यश्च त्रिधा विभज्य त्रीनिति सार्धेनाह
शौल्कायनिरिति ॥ २ ॥ नक्षत्रकल्पः शांतिकल्पश्च तिस्रौ तदुक्तं ॥ नक्षत्रकल्पो वेदानां संहितानां तथैव च
चतुर्थः स्यादांगिरसः शांतिकल्पश्च पंचमः स्मृत इति ॥ नक्षत्रकल्पादीनां कर्तारः तत्तन्नाम्ना अभिरुच्यंते ॥ ४ ॥ म
त्पितुर्मुखादिति प्रथमं व्यासः षट्संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात् ॥ तस्य च मुखादेते
त्रय्यारुण्यादयः एकैकां संहितामधीयंत एतेषां च सर्वेषां शिष्योऽहं ताः सर्वाः समधीतवान् ॥ ५ ॥ ॥

रामशिष्योऽयो, कृतव्रणः ॥ एवं चत्वारो वयं मूलसंहिता इत्यनेन ॥ ततः संहिताबाहुल्यं सूचितं ॥ ७ ॥ श्रीमच्छुक
परीक्षिद्ब्रह्मर्षिसंवादे निरूपितमपि पुराणलक्षणं उद्देशकथनाय दर्शयति पुराणेति ॥ ८ ॥ अस्य विश्वस्य
अस्तर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः इत्यत्रोक्तस्थानपो
षणोत्यूतीन् वृत्तिरक्षाशब्दाभ्यां उच्यते ॥ अन्तराणि मन्वन्तराणि वंशो वंश्यानुचरितमिति ॥ ईशानुकथाः संस्था ।
निरोधः अनेनैवान्वयं तिकलयरूपा मुक्तिरप्युक्ता हेतुशब्देन जीवाश्रयवासना शब्देन वाच्या ऊतयोऽपि गृही
ताः ॥ ९ ॥ दशभिर्लक्षणैर्युक्तं महापुराणं विदुः केचित्पंचविधं ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वं

कश्यपोऽहं च सावर्णी रामशिष्योऽकृतव्रणः ॥ अधीमहि व्यासशिष्याच्चत्वारो मूलसंहिताः
७ ॥ पुराणलक्षणं ब्रह्मन्ब्रह्मर्षिभिर्निरूपितम् ॥ शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसार
तः ॥ ८ ॥ सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षान्तराणि च ॥ वंशो वंश्यानुचरितं संस्था हेतुरप
पाश्रयः ॥ ९ ॥ दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ॥ केचित्पंचविधं ब्रह्मन्महद
ल्पव्यवस्थया ॥ १० ॥ अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः ॥ भूतसूक्ष्मेंद्रिया
र्थानां संभवः सर्ग उच्यते ॥ ११ ॥ श्रीरामाय नमः ॥

न्तराणि च ॥ वंश्यानुचरितं चेति पुराणं पंचलक्षणमिति ॥ महत्पुराणमल्पं चेति व्यवस्थया यत्र दशापि लक्ष
णानि दृश्यन्ते तन्महापुराणं ॥ यत्राल्पानि पंच लक्षणानि तत् अल्पमिति व्यवस्थे
त्यर्थः ॥ १० ॥ सर्गादिलक्षणानि व्याचष्टे अव्याकृतेत्यादिना प्रधानस्य गुणानां क्षोभतया महान् ॥ त
स्मात् त्रिवृत् अहंकारः तस्मात् भूतमात्राणां सूक्ष्माणां इंद्रियाणां च तदर्थानां च स्थूलानां तद्देवतानां च संभ
वः सर्गः कारणसृष्टिः सर्ग इत्यर्थः उच्यत इति यथापेक्षात् उत्तरत्रापि अनुसंधेयं ॥ ११ ॥

विसर्गं व्याचष्टे पुरुषेणेश्वरेणानुगृहीतानामेतेषां महदादीनां पूर्वकर्मवासनाप्रधानोऽयं समाहारः कार्य-
भूतः चराचरप्राणिरूपो बीजाद्बीजमिव प्रवाहापन्नो विसर्ग उच्यत इत्यर्थः ॥ १२ ॥ चराणां भूतानां सामान्यतो
ऽचराणि च काराच्चराणि च कामाद्वृत्तिः तत्र तु नृणां स्वेन भावेन कामात् चोदनयापि वा या नियता वृत्तिः जीवि-
काकृता सा वृत्तिरुच्यत इत्यर्थः ॥ १३ ॥ तिर्यङ्मनुष्यदेवेषु ऋषिषु ये ऽच्युतावताराः तेषामीहा लीला सा विश्व-
स्य रक्षोच्यत इत्यर्थः ॥ यैरवतारैरिति समासान्तर्भूतस्य कथंचित्संबंधः त्रयीद्विषो दैत्याः ॥ १४ ॥ षड्विधम-
न्वंतरं तत्र मन्वंतरे षड्विधत्वमेवाह ॥ मनुरिति मन्वादयः षडेते वर्गाः स्वस्वाधिकारेण यत्र वर्तन्ते तं मन्वंतरं इ-

पुरुषानुगृहीतानामेतेषां वासनामयः ॥ विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम् ॥ १२
वृत्तिर्भूतानि भूतानां चराणामचराणि च ॥ कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा ॥ १३ ॥
रक्षाच्युतावतारेहा विश्वस्यानु युगे युगे ॥ तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः ॥ १४
मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः ॥ ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते ॥ १५ ॥
राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ॥ वंशानुचरितं तेषां वृत्तं वंशधराश्च ये ॥ १६ ॥ नै-
मित्तिकः प्राकृतिको नित्य आत्यंतिको लयः ॥ संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभा-
वतः ॥ १७ ॥ हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः ॥ यं चानुशायिनं प्राहुरव्याकृतमुताप-
रे ॥ १८ ॥

त्यर्थः ॥ वंशमाह ब्रह्मणः सकाशात्प्रसूतिर्येषां प्रसूतानामित्यर्थः तेषामन्वयो वंशः तेषां वृत्तं ये च तद्वं-
शधरास्तेषां च वृत्तं वंशानुचरितमुच्यते ॥ १६ ॥ अस्य विश्वस्य स्वभावतो मायातो निमित्तत्रयस्य ॥ यद्वा मा-
यातो यश्च तु विधो लय इति ॥ १७ ॥ अस्य जगतः सर्गादि हेतुर्निमित्तं जीवः सोऽत्र हेतुरुच्यत इत्यर्थः ॥
तस्य निमित्तमाह ॥ अविद्यया कर्मकारकाः कर्मकर्तो जीवादृष्टप्रयुक्तत्वाद्विश्वसर्गादेः सत्त्वहेतु-
रित्यर्थः ॥ ननु अनुशायी निमित्तमिति केचित् ॥ अव्याकृतमित्यपरे ॥ तत्राह यमिति ॥ चैतन्यप्रधा-
न्येनानुशायिनं उपाधिप्राधान्यविवक्षया अव्याकृतम् ॥ १८ ॥ ॥ एम ॥ ॥

श्री·
भा·टी·
१२
टी·

अपाश्रयमाह॥ व्यतिरेकेति जाग्रदादिषु अवस्थासु जीवनया वर्तनेन तु निर्जीववृत्तिन यो विश्वतैजसप्राज्ञाः
तेषु मायामयेषु साक्षितयान्वयः॥ समाध्यादौ च व्यतिरेकी यस्य तद्ब्रह्म संसारप्रतीतिव्याधयोरधिष्ठा
नावधिभूतम् अपाश्रय उच्यत इत्यर्थः॥ २१॥ तदेव स्पष्टान्तेन प्रपंचयति पदार्थेषु घटादिषु द्रव्यं मृदादि यथा
युतमन्वितं अयुतं च बहिरथा व्यस्थानात रूपाणां च सत्व तन्मात्रं सत्तामात्रं यथा॥ एवं बीजं गर्भाधान
मादियासां पंचता, तोयासां तासु देहावस्थासु नवस्वपि॥ अधिष्ठानत्वेन साक्षित्वेन युतमयुतं च यत्तद्

व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु॥ मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः
२१॥ पदार्थेषु यथा द्रव्यं तन्मात्रं रूपनामसु॥ बीजादिपंचतांतासु ह्यवस्थासु युता
युतम्॥ २०॥ विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयम्॥ योगेन वा तदात्मानं वेदेहाया
निवर्तते॥ २१॥ एवं लक्षणलक्ष्याणि पुराणानि पुराविदः॥ मुनयोष्टादश प्राहुः क्षुल्लका
नि महांति च॥ २२॥ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडं॥ नारदीयं भागवतमाग्नेयं
स्कंदसंज्ञितम्॥ २३॥ भविष्यं ब्रह्मवैवर्तं मार्कंडेयं सवामनं॥ वाराहं मात्स्यं कौर्मं च ब्रह्मा
ंडाख्यमिति त्रिषट्॥ २४॥ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः॥ शिष्यशि
ष्यप्रशिष्याणां ब्रह्मतेजोविवर्धनम्॥ २५॥

पाश्रय इति॥ २१॥ एवं दशापि लक्षणानि व्याख्याय वर्णयंति॥ महात्मन इति यदुक्तं तदाह विरमेतेति
यदा सर्गादीनां मायामयत्वानुसंधानेन वामदेवादेः स्वयमेव चित्तं विरमेत॥ इहैवानुष्ठितेन योगेन वा
देवकृत्यादिवत् तदा वित्तिपामावात्॥ आत्मानं वेद तदा चाविद्या निवृत्तेरीहायाः चेष्टायाः संसाररू
पाया निवर्तते इत्यर्थः॥ २२॥ पुराणानि श्रीभागवतप्रस्तावेन तल्लक्षणानि प्रासंगिकमुक्त्वा प्रस्तुत
माह॥ एवं विधैर्लक्षणैः लक्ष्याणि॥ २३॥ त्रिषट् अष्टादश॥ २४॥ उपसंहरति ब्रह्मन्निति मुनेर्व्यासस्य
शिष्यादीनां ब्रह्मतेजः ब्रह्मवर्चसं तद्विवर्धनं श्रोतॄणां इति शेषः॥ २५॥

राम
२३

इति श्रीभावार्थदीपिकायां द्वादशे सप्तमः ॥७॥ अष्टमे तु तपस्तुष्टो मार्कंडेयस्य मोहकृत् ॥ कामादिभि
रसंस्पृष्टो हरिर्नारायणस्तुतिः ॥ पुराणविभागप्रसंगेन पुराणकर्तुर्मार्कंडेयस्य चरितं प्रस्तुतमाह ॥ सूतेति ॥
त्वमेव वक्तुं योग्य इत्याह ॥ तमसि संसारे भ्रमतां पारदर्शनः तन्निवर्तकः ॥१॥ वक्तव्यमाह ॥ आयुरिति ॥ उर्व
रितः अवशिष्टः ॥ येन कल्पांते न पतति तत्कथं घटते इत्येकः प्रश्नः ॥२॥ प्रलयाभावाद्धेतोस्तन्न घटत इत्याह ॥
स वा इति यतो भार्गवर्षभः कोऽपि प्राकृतिको नैमित्तिको वा ॥३॥ अन्यदप्यसंघटितमित्याह ॥ एक एवेति

इति श्रीभागवते द्वादशस्कंधे सप्तमोऽध्यायः ॥७॥ शौनकः ॥ सूत जीव चिरं साधो वद नो वद
तां वर ॥ तमस्यपारे भ्रमतां नृणां त्वं पारदर्शनः ॥१॥ आहुश्चिरायुषमृषिं मृकंडतनयं जनाः
यः कल्पांते उर्वरितो येन ग्रस्तमिदं जगत् ॥२॥ स वा अस्मत्कुलोत्पन्नः कल्पेऽस्मिन् भार्गवर्षभः
नैवाधुनापि भूतानां संप्लवः कोऽपि जायते ॥३॥ एक एवार्णवे भ्राम्यन् ददर्श पुरुषं किल ॥ वट
पत्रपुटे तोकं शयानं त्वेकमद्भुतं ॥४॥ एष नः संशयो भूयान् सूत कौतूहलं यतः ॥ तं नः छिंधि म
हायोगिन् पुराणेष्वपि संमतः ॥५॥ सूत उवाच ॥ प्रश्नस्त्वया महर्षेऽयं कृतो लोकभ्रमापहः
नारायणकथा यत्र गीता कलिमलापहा ॥६॥ प्राप्तद्विजातिसंस्कारो मार्कंडेयः पितुः क्रमा
त् ॥ छंदांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ॥७॥

तोकं बालकं ॥४॥ कौतूहलमौत्सुक्यं ॥ न केवलं ॥ त्वं महायोगी ॥ किंतु पुराणेष्वपि विज्ञातृत्वेन संमतः ॥५॥
प्रश्नमभिनंदति ॥ हे महर्षे शौनक ॥ अयं प्रश्नः तत्र हेतुः ॥ नारायणेति यत्र प्रश्नविषये ॥६॥ तत्र मार्कंडेयः
तपसा श्रीभगवंतमाराध्य मायाप्रदर्शनं वव्रे ॥ ततस्तुतेनैव श्रीभगवन्मायया हेतुना सप्त कल्पाः दृष्टाः ता
न्येव इत्युत्तरं वक्तुं आदित आरभ्य तस्य मार्कंडेयस्य चरितमाह प्राप्त इत्यादिना मार्कंडेयो मृत्युं जिगाय इति पं
चमश्लोकेनान्वयः मध्यमग्रंथेन तस्य धर्मः कथ्यते प्राप्तो द्विजातिसंस्कारः उपनयनाख्यो येन सः पितुः
सकाशात् गर्भाधानादिक्रमात् ॥ छंदांसि वेदान् ॥७॥

श्री-
भा-स्कं-
टी-
२४

वृहद्व्रतधरः नैष्ठिकब्रह्मचारी सन् ॥ ८ ॥ नियमहृदयं धर्मे हृदये अस्मादिपुपंचसुहृरिमचेयन ॥ ९ ॥ मैत्स्यंगु
वेयमाहृत्यनेनानुज्ञानः चेत न हिंस्त्रुधुक्तेनो चेत कदाचिदुपोषितो भवति ॥ १० ॥ तेन मुत्सुज्जयेव ॥ ११ ॥
धूत्वा विध्वंसिताः क्लेशा रागादयो यस्य तेनांतरात्मना प्रत्याहृतेन मनसा ॥ १२ ॥ तस्य तपोनिष्ठामिति हा
सेन वर्णयति ॥ एतदित्यादिना ॥ अस्मिंत्सप्तमे मन्वंतरे तपसा मत्पदं ग्रहीष्यतीति विशंकितः ॥ १४ ॥
वृहद्व्रतधरः शांतो जटिलो वल्कलांबरः ॥ बिभ्रत्कमंडलुं दंडमुपवीतं समेखलम् ॥ ८ ॥ कृ
ष्णाजिनं साक्षसूत्रं कुशांश्च नियमैधृतः ॥ अग्न्यर्कगुरुविप्रात्मस्वर्चयन्संध्ययोर्हरिं ॥ ९
सायं प्रातः स्वगुरवे भैक्ष्यमाहृत्य वाग्यतः ॥ बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥ १० ॥
एवं तपः स्वाध्यायपरो वर्षाणामयुतायुतम् ॥ आराधयन्हृषीकेशं जिग्ये मृत्युं सुदुर्जे
यम् ॥ ११ ॥ ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च ये परे ॥ नृदेवपितृभूतानि तेनासन्नतिवि
स्मिताः ॥ १२ ॥ इत्थं वृहद्व्रतधरः तपः स्वाध्यायसंयमैः ॥ दध्यावधोक्षजं योगी ध्वस्तक्ले
शांतरात्मना ॥ १३ ॥ तस्यैवं युंजतः चित्तं महायोगेन योगिनः ॥ व्यतीयाय महान्कालो
मन्वंतरषडात्मकः ॥ १४ ॥ एतत्पुरंदरो ज्ञात्वा सप्तमेऽस्मिन्किलांतरे ॥ तपोविशंकितो ब्रह्मन्ना
रेभे तद्विघातनम् ॥ १५ ॥ गंधर्वाप्सरसः काममवसंतमलयानिलौ ॥ मुनये प्रेषयामास रजस्
तोकमदौ तथा ॥ १६ ॥ ते वै तदाश्रमं जग्मुः हिमाद्रेः पार्श्व उत्तरे ॥ पुष्पभद्रा नदी यत्र चित्राख्या
च शिला विभो ॥ १७ ॥ तदाश्रमपदं पुण्यं पुण्यद्रुमलताचितं ॥ पुण्यद्विजकुलाकीर्णं पुण्या
मुनयो मुनिं मार्कंडेयं धर्षयितुं तामसलोकमधिपिप्रियेलोभः मदश्च तौ ॥ १६ ॥ तदाश्रमपदं प्रविष्टो वा
पुर्वं वा विति । तृतीयेनान्वयः ॥ पुण्यैर्द्रुमैर्लताभिश्चाचितं पूजितं पुण्यद्विजानां पक्षीणां कुलैराकी
र्णं पुण्य॰ अत्यमलाजलाशयायस्मिन् ॥ १८ ॥ ॥ ॥ श्रीराम ॥ ॥
श्रीकृष्ण ॥ ॥ ॥ ॥ श्रीगोपाल ॥

[illegible] ॥ १४ ॥

राम
२५

मत्तभ्रमराणां संगीतं यस्मिन् ॥ मत्तकोकिलानां कूजितं यस्मिन् ॥ मत्तबर्हिणां नटनं वनदालस्य मादोपः संभ्रमः यस्मि
न् मत्तद्विजानां पक्षिणां कुलैराकुलं व्याप्तं ॥ १९ ॥ एवंभूतं तदाश्रमपदं प्रविष्टः सन् वायुर्मलयानिलो ववौ प्रस्मार
उत्तंभयन् ॥ उद्दीपयन् ॥ तत्र कृतेषु प्रवेशानां यं हिमनिर्झरकणानां शैत्यं पुष्पपरिसृतं गात् ॥ सौगंध्यं ॥ २० ॥ किं
वसंतं चंद्रो यस्मिन् तत्र निशावक्त्रं रजनीमुखं यस्मिन् सः प्रवालपल्लवकान्तामालतः श्रेण्याः पुनः गुच्छैर्नि विटपैः
संश्लिष्टं नीतिगोपादुमाः लतां श्वेतप्रजालैः समूहैराविर्बभूव ॥ २१ ॥ किं च तदा गीतवादित्रयूथकैः गायका

मत्तभ्रमरसंगीतं मत्तकोकिलकूजितम् ॥ मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलम् ॥ १९ ॥ वा
युः प्रविष्ट आदाय हिमनिर्झरशीकरान् ॥ सुमनोभिः परिष्वक्तो ववावुत्तंभयन्स्मरं ॥ २० ॥ उद्य
च्चंद्रनिशावक्त्रं प्रवालस्तबकालिभिः ॥ गोपद्रुमलताजालैस्तत्रासीत्कुसुमाकरः ॥ २१ ॥ अन्वी
यमानो गंधर्वैर्गीतवादित्रयूथकैः ॥ अदृश्यतात्तचापेषुः स्वःस्त्रीयूथपतिः स्मरः ॥ २२ ॥ हु
त्वाग्निं समुपासीनं ददृशुः शक्रकिंकराः ॥ मीलिताक्षं दुराधर्षं मूर्तिमंतमिवानलम् ॥ २३ ॥ ननृ
तुस्तस्य पुरतः स्त्रियोऽथो गायका जगुः ॥ मृदंगवीणापणवैर्वाद्यं चक्रुर्मनोरमम् ॥ २४ ॥ संदधे
ऽस्त्रं स्वधनुषि कामः पंचमुखं तदा ॥ मधुर्मनो रजस्तोक इंद्रभृत्या व्यकंपयन् ॥ २५ ॥ क्रीडंत्याः पुंजि
कस्थल्याः कंदुकैः स्तनगौरवात् ॥ भृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः ॥ २६ ॥

दिस्तमुदायिभिः गंधर्वैरन्वीयमानः तथा स्वस्त्रियो प्सरसः तासां यूथपतिः आत्तं चापं इषुश्च येन सः स्मरश्च
येन सः स्मरश्च तत्राऽदृश्यत ॥ २२ ॥ दुराधर्षं अभिभवितुं प्राप्तुं अशक्यं ॥ २३ ॥ शोषणमोहनसंदीपनत
पनोन्मादनानि पंचमुखानि यस्य तत् दिव्यास्त्रं संदधे तदैव मधुर्वसंतः ॥ रजस्तोकश्च पुत्रस्त्वमार्थं ॥ अन्ये चेंद्रभृ
त्याः स्वमनो व्यकंपयन् ॥ २५ ॥ ॥ ॥ श्रीगोपालाय नमः ॥

श्री॰ भा॰ द्वा॰ टी॰ २५

किंच वायुर्मलयानिलः पुंजिकस्थल्याः तन्दूत्सं वा सोऽपहार ॥ १७ ॥ सर्वं तत्पाकमेनत्व ननस्मिन्मोहं स्मर्थं मुनी
शस्य निर्दैवस्य ॥ १८ ॥ मुनेरपकुर्वंतः प्रतिकूलमाचरंतः हे मुने शौनक ॥ १९ ॥ अहमः अहंकारस्य भावं वि
कारं ॥ २० ॥ नावनुवर्णयतिह्वाभ्यां ॥ गौरवं कृष्णाजिनं वल्कलं चांबरं च ययोर्लोपवित्रीपाणी ययोर्लो त्रिवृत्
त्रिगुणं नवनं तत्कमिति वा त्रिवृद्वहिः पवमानमित्यादौ नवतं त्वादिमयम ॥ २१ ॥ वेदं च दर्भमुष्टिं च किंच

तत्त्वतो मूर्धमद्दृष्टे शूलदेरात्तु कंडुकम ॥ वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलम् ॥ १७ ॥ वि
ससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः ॥ सर्वं तत्राभवन्मोघमनीशस्य यथोद्यमः ॥ १८ ॥ तइत्थ
मपकुर्वंतो मुनेस्तत्तेजसा मुने ॥ दह्यमाना निववृतुः प्रबोध्याहिमिवार्भकः ॥ १९ ॥ इतीदं तु
चरित्रं स्वं धर्षितोपि महामुनिः ॥ यन्नागादहमो भावं न नत्स्वित्रं महत्स्वपि ॥ २० ॥ दृष्ट्वा निस्तेजसं
कामं सगणं भगवान्स्वराट् ॥ श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्परं ॥ २१ ॥ तस्यैवं युंजतश्चि
त्तं तपःस्वाध्यायसंयमैः ॥ अनुग्रहायाविरासीन्नरनारायणो हरिः ॥ २२ ॥ तौ शुक्लकृष्णौ न
वकंजलोचनौ चतुर्भुजौ रौरववल्कलांबरौ ॥ पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं
च वैणवम् ॥ २२ ॥ पद्माक्षमालामुत जंतुमार्जनं वेदं च साक्षात्तप एव रूपिणौ ॥ तपत्तडिद्व
र्णपिशंगरोचिषा प्रांशू दधानौ विबुधर्षभार्चितौ ॥ २४ ॥ ते वै भगवतो रूपे नरनारायणावृषी
दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेन दंडवत् ॥ २५ ॥ स तत्संदर्शनानंदनिर्वृतात्मेंद्रियाशयः ॥ हृ
ष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं ॥ २६ ॥

साक्षात्तप एव तौ तत्र हेतुः ॥ तपत्तडिद्वर्णं दीप्यमानं विद्युत्संकाशं यत्पिशंगं रोचिस्तेन ॥ रूपिणौ मूर्तिमं
तौ ताहक्कं जीवुक मूर्तिमंतं नयोमयत्वेन प्रकाशमायाविप्रर्षभैः प्रांशू उन्नतौ ॥ २४ ॥ उच्चैर्महता आदरेण
२५ ॥ तयोः संदर्शनेन य आनंदः तेन निर्वृता उपशांताः आत्मेंद्रियाशयाः देहेंद्रियमनांसि यस्य सः न
सेहे नाशक्नोत् ॥ २६ ॥ श्रीगोपालायनमः ॥

राम
२५

आश्लिष्य नालिंगयन्निव ॥ ४७ ॥ पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेन अर्घ्येण ॥ ४८ ॥ पादावानम्य गरिष्ठौ पूजयन
मौनौप्रति ॥ ४९ ॥ अनयोर्मिलनेन स्वस्यैव प्राणादिप्रवर्तनं ज्ञात्वा ॥ आत्मन लक्ष्यत्वानावश्यकत्वं ध्वनयन्नाह किमिति हि
विभो ॥ न वलं विभु महं वर्णये कथं तौ मिथयद्येन त्वयैवोदीरितः प्रेरितो मरुः प्राणः संस्पंदते प्रवर्तते तेन मरुत मनुवा
गादयः स्पंदंति ॥ अत्र हेतुर्वै अन्वयव्यतिरेकाभ्यां श्रोत्रस्य श्रोत्रमित्यादिश्रुतिः मिथुनस्य सिद्धमित्यर्थः ॥ न के
वलं प्राकृतानां तनुभृतां ॥ किंतु ॥ अजशर्वयोरपि स्वस्याप्यथापि ॥ अतः स्वस्य ममापि तथैव ॥ एवं यद्यपि
न कश्चिदपि कस्यापि स्वातंत्र्यं अथापि दारुयंत्रवत् प्रवर्तितानां अपि वागादिभिः ॥ भजतां पुंसां भावबंधुः आत्म

अभ्याय प्रांजलिः प्रवृद्धौत्सुक्यादाश्लिष्यन्निव ॥ नमोनमद्रुत्नीशानौ बभाषे गद्गदाक्षरः ॥ ४७ ॥ न
यौ प्राणमनमादाय पादयोरवनिज्य च ॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥ ४८ ॥ स्वस्वमास
नमासीनौ प्रसादाभिमुखौ मुनिः ॥ पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ॥ ४९ ॥ मार्कंडेय
उवाच ॥ किं वर्णये तव विभो यदुदीरितोसुः संस्पंदते तमनुवाङ्मन इंद्रियाणि ॥ स्पंदंति वै
तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबंधुः ॥ ५० ॥ मूर्ती इमे भगवतो भग
वंस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजित्यै ॥ नाना बिभर्ष्यवितुमन्यतनूर्यथेदं सृ
ष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभिः ॥ ५१ ॥

बंधुरसि न तु पित्रादिवद्देहबंधुः अहो कृपालुतातनवेत्यर्थः ॥ ५० ॥ ननु कथमावां प्राणादिप्रवर्तकौ धर्मपु
त्रत्वादावयोरिति चेत्तत्राह ॥ मूर्ती इति हे भगवन् ॥ भगवतस्तव इमे मूर्ती त्रिलोक्याः क्षेमाय पालनाय ता
पविरमाय दुःखनिवृत्त्यै मृत्युजित्यै मोक्षाय च न तु त्वं कस्यापि पुत्र इत्यर्थः ॥ अत्र दृष्टांतः ॥ यथेदं विश्वम
वितुमन्यास्तनूर्मत्स्यकूर्मादिलक्षणाः नाना अनेकप्रकारादिभिः बिभर्ष्यनदस्त ॥ न केवलं पालनादिमा
त्रं नवकर्म ॥ किंतु संहितलयानपीत्याह ॥ सृष्ट्वेति तत्रापि अन्यनिरपेक्षत्वे दृष्टांतः ऊर्णनाभिरिवेति

श्री॰
भा॰ टी॰
टी॰
२६

यस्मादेवंभूतस्त्वं तस्मात्त्वदंघ्रिमूलं भजामीत्याह तस्येति ॥ तस्याखिलः पालकस्य स्थावरजंगमानामीश्वरस्य
भजामीति तृतीयश्लोकस्थानुषंगः कथंभूतमंघ्रिमूलं यत्स्थं यत्र विलीनं स्थितं कर्मगुणकालानां ॥ रजो मलं
अन्यैश्च पूर्वोक्ताः ताः पाश्वेन स्पृशंति रजइतिवा पाठः वेदो हृदये येषां ते वेदहृदयास्तद्विदो मुनयः यद्वैस्तु
वंति निनमंति नमंति तत्तु तत्प्राप्तये एव स्तवनादि कुर्वंतीति ॥ ४२ ॥ यतस्त्वत्तः पुरुषार्थो नान्यस्तीत्याह ॥ नान्यमिति ॥
अंघ्र्युपनयनात् श्रीमच्चरणप्राप्तेः अन्यत्क्षेमं न विद्मः परितः सर्वतोपि लोकेषु भीयस्य जनस्य ॥ तत्राह
द्विपरार्धे धिष्ण्यं स्थानं यस्य सः ब्रह्मापि ते कालस्य त्वद्भ्रूविहृतं महत्पादलं बिभेति ॥ अतः किमुत वक्तव्यं ॥ तेन

तस्याखिलः स्थिरचरेशितुरंघ्रिमूलं यत्स्थं न कर्मगुणकालरजः स्पृशंति ॥ यद्वैस्तुवंति निनमं
ति यजंत्यभीक्ष्णं ध्यायंति वेदहृदया मुनयस्तदाप्त्यै ॥ ४२ ॥ नान्यं तवांघ्र्युपनयादपवर्गमूर्तेः
क्षेमं जनस्य परितोभिय ईश विद्मः ॥ ब्रह्मा बिभेत्यलमतो द्विपरार्धधिष्ण्यः कालस्य ते किमुत त
त्कृतभौतिकानाम् ॥ ४३ ॥ तद्वै भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः प
रस्य ॥ देहाद्यपार्थमसदंत्यमभिज्ञमात्रं विंदेत ते तर्हि सर्वमनीषितार्थं ॥ ४४ ॥

ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ॥ ४३ ॥ यस्मादेवं तस्मात्तव पादमूलं भजामि कथंभूतस्य
ऋतधियः सत्यज्ञानस्वरूपस्य यद्वा सत्याधीशस्य ॥ यस्मिन्वा तस्यात्मगुरोः जीवनियंतुः अतः कारणा
त्परस्य किं कृत्वा आत्मच्छदि आत्मावरकं अपार्थं वा अपगतोर्थः निष्फलमित्यर्थः ॥ असदंत्यं च नश्व
रमिदं देहादि हित्वा देहादिभजनं हित्वा त्यक्त्वा असदंत्यं ॥ कथं प्रतीयते तत्राह अभिज्ञमात्रं नत्वन्यत्तमसत्व
किं तु ज्ञप्तिमात्रं ततः इष्टमाप्तमित्यर्थः ॥ ननु पदं गीयमभवत्तु महद्भजनं फलांतरार्थं त्वद्भजनं कार्यमे राम
व तत्राह ॥ नहीति ॥ यदि त्वां भजति पुरुषः तर्हि तेभ्यस्तत्प्राप्य सर्वं मनीषितमर्थं विंदेतेति ॥ ४४ ॥ २६

ननु त्वन्तहृदावपि ममैव मूर्तौ॥ अतो मामेव किमर्थं न मादृशमेव नवाहं सत्वमिति॥ यद्यपि यद्यपि॥ नवैवं मा
याऽहं मा एता लीलाः त्वयैव धृताः तथापि या सत्वमयी सैव प्रशांत्यै मोक्षाय॥ न केवलं मस्य प्रशांत्यभाव मा
त्रमन्यभजने किं तु निष्टं च किंचित्तस्य थाने मवेदित्याह व्यसनेनेति॥ ४५॥ तदेवं सदाचारेण दृढयति॥ तस्मा
दिति हे भगवन्॥ तव शुक्लां तनुं श्रीमन्नारायणाख्यामथ च तावकानां च शुक्लां तनुं नराख्यां यद्यस्मात्॥ सा
त्वताः सत्वमेव [illegible] यस्माद्धीश्वरस्य रूपमुशंतीति मन्यंते तेन तत्वमुक्त॥ ज्ञलमश्रुति॥ अत्र हेतुः यतः सात्वत
लोके वैकुंठाख्ये लोकत्वे सत्यप्यभयं वा भोगे सत्यपि आत्मसुखं च॥ ४६॥ अतस्तं प्रणमति नम इति

सत्वं रजस्तम इतीश तवात्मबंधो मायामयः स्थितिलयोदयहेतवोऽस्य॥ लीलाधृता यद
भिसत्वमयी प्रशांत्यै नान्ये नृणां व्यसनमोहभियश्च याभ्यां॥ ४५॥ तस्मान्न वेह भगवन्न
थ तावकानां शुक्लां तनुं स्वदयितां कुशला भजंति॥ यस्मात्वताः पुरुषरूपमुशंति सत्वं
लोके यतोऽभयमुतात्मसुखं च नान्यत्॥ ४६॥ तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय वि
श्वगुरवे परदेवतायै॥ नारायणाय ऋषये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय
४७॥ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः संतं स्वखेष्वसुषु हृद्यपि दृक्पथेषु॥ तन्माय
याऽवृतमतिः स उ एव साक्षादाद्यस्तवाखिलगुरोरुपसाद्य वेदम्॥ ४८॥

हंसाय शुद्धाय संयतगिरे नियतवाचे अथ निगमेश्वराय वेदमार्गप्रवर्तकाय॥ ४७॥ वेदार्थं संप्रदाय
प्रवर्तने हेतुत्वं वदं लोनियमितिके इंद्रियमार्गैः भ्रमद्धीः वितितप्रधीः पुमान् खेष्विंद्रियादिषु नियंतृत्वे
न संतमपि त्वां न वेद दृक्पथेषु विषयेषु बुद्धिवितितयहेतुः तन्मायया नस्य नवैव मायया वृतमतिराच्छन्नात्म
निष्ठामतिर्यस्य सः अतो पि आद्य एव पूर्वमज्ञातं वेदमखिलगुरोस्तवत्वत्प्रवर्तितं वेदमुपसाद्य संप्राप्य तं
त्वां साक्षाद्वेद॥ ४८॥ ॥ श्रीराम ॥ श्रीरामाय नमः ॥

श्री· भा·द्वा· टी· ९२

वेदेनैवलब्धावगमित्युपपादयन्नुपलम्भनिमित्तस्य तव दर्शनं निगमे भवतीति कथंभूतमात्मनस्तव रहस्य
प्रकाशकं ॥ अन्यथा दुर्ज्ञेयतामाह ॥ अजपरा ब्रह्मसमुत्थ्योः कवयो विप्रां योगादिभिर्यतमाना यतन्तो
विमुह्यन्ति ॥ कुत इत्यत आह ॥ सर्वेषां सांख्यादिवादानां विषया भेदादयस्तेषां प्रतिरूपं शीलं स्वभावो
यस्य तं ॥ कुतः आत्मना देहसंज्ञानेन निगूढो बोधो यस्य तमेवंभूतं महापुरुषं त्वां वंदे ॥ ४९ ॥
इति श्री भा वा र्थ दी पि का यां द्वा द शे ष्ट मः ॥ ८ ॥ नवमे भगवन्मायादिदृक्षोर्दर्शनं मु

यद्दर्शनं निगम आत्मरहःप्रकाशं मुह्यन्ति यत्र कवयोऽजपरा यतन्तः ॥ तं सर्ववादविष
यप्रतिरूपशीलं वंदे महापुरुषमात्मनिगूढबोधम् ॥ ४९ ॥ इति श्री भा ग व ते द्वा द
शस्कंधे ऽष्ट मो ध्या यः ॥ ८ ॥ सू त उ वा च ॥ संस्तुतो भगवानित्थं मार्कंडेये
न धीमता ॥ नारायणो नरसखः प्रीत आह भृगूद्वहं ॥ १ ॥ श्री भ ग वा नु वा च ॥ भो भो
ब्रह्मर्षिवर्योसि सिद्ध आत्मसमाधिना ॥ मयि भक्त्यानपायिन्या तपःस्वाध्यायसंय
मैः ॥ २ ॥ वयं ते परितुष्टाः स्म त्वद्बृहद्व्रतचर्यया ॥ वरं प्रतीच्छ भद्रं ते वरदेशादभीप्सित
म् ॥ ३ ॥ ऋ षि रु वा च ॥ जितं ते देवदेवेश प्रपन्नार्तिहराच्युत ॥ वरेणैतावतालं नो य
द्भवान्समदृश्यत ॥ ४ ॥

नेः ॥ मायाशिशुलीलयाश्चैव मुनेर्निर्वेशनिगमैः ॥ श्रीभगवतः परितोषपूर्वकं तदपेक्षितवरदानं
कथयितुमाह ॥ संस्तुत इत्यादिना ॥ १ ॥ आत्मसमाधिना चित्तैकाग्र्येण ॥ २ ॥ वयं परितुष्टाः स्मेति
बहुवचनं सर्वदेवाभिप्रायेण वरदेशादित्येकवचनं ॥ द्वयोरैक्याभिप्रायेण प्रतीच्छ गृहाण ॥ ३ ॥ वरे
णालं क्षयिता त्वया जितं त्वत्पादर्शिनः ॥ मम तु वरकांक्षा नास्तीत्याह वरेणेति ॥ ४ ॥

श्रीगोपालाय नमः ॥ श्रीकृष्णाय नमः ।

राम ९२

यस्य न व श्रीमत्पादाब्जदर्शनं मनसा गृहीत्वा प्राप्य प्राकृता अप्यजादयो भवंति ॥ स भवान्मेक्षिगोचरो जातो
ऽसि किमतः परं वरेणेत्यर्थः ॥ ५ ॥ ईदृशैर्द्रष्टुमिच्छामि लोकपालैर्ब्रह्मादिभिः सहितो यं लोकः ज्ञानः सद्भिदां स
निवस्तुनि भिदं यथेति ॥ ६ ॥ तथेति द्रष्टव्यं मीति स्मयन् ॥ सस्मयः प्रागात्पार्श्वांतरे क्रियाविशेषणम् ॥ ७ ॥ तमे
वार्थं मायादर्शनं हृदि पश्यन्नग्न्यादिमूर्तिषु ॥ ८ ॥ भावद्रव्यैर्मनोमयद्रव्यैः क्वचित्कदाचित्प्रेमप्रसरसंप्लुतः प्रेमो

गृहीत्वा ज्ञादयो यस्य श्रीमत्पादाब्जदर्शनम् ॥ मनसा योगपक्वेन स भवान्मेक्षिगोचरः
५ ॥ अथाप्यंबुजपत्राक्ष पुण्यश्लोकशिखामणे ॥ द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भि
दाम् ॥ इतीडितोर्चितः कामं ऋषिणा भगवान्मुनेः ॥ ६ ॥ तथेति स स्मयंप्रागाद्बदर्याश्रममी
श्वरः ॥ ७ ॥ तमेव चिंतयन्नर्थं ऋषिः स्वाश्रम एव सः ॥ वसन्नग्न्यर्कसोमांबुभूवायुवियदा
त्मसु ॥ ८ ॥ ध्यायन्सर्वत्र च हरिं भावद्रव्यैरपूजयत् ॥ क्वचित्पूजां विसस्मार प्रेमप्रसर
संप्लुतः ॥ ९ ॥ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुनेः ॥ उपासीनस्य संध्यायां ब्रह्मन्वायुरभू
न्महान् ॥ १० ॥ तं चंडशब्दं समुदीरयंतं बलाहका अन्वभवन्करालाः ॥ अक्षस्थविष्ठा मुमु
चुस्तडिद्भिः स्वनंत उच्चैरभिवर्षधाराः ॥ ११ ॥ ततो व्यदृश्यंत चतुः समुद्राः समंततः क्ष्मा
तलमाग्रसंतः ॥ समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्तगभीरघोषाः ॥ १२ ॥

द्रेकं प्राप्तः ॥ ९ ॥ मायादर्शनमाह तस्येत्यादिना ॥ १० ॥ तं वायुमनु बलाहका मेघा अन्वभवन् ॥ आविर्बभू
वुः नेच नतडिद्भिः सहिता उच्चैः स्वनंतः गर्जंतः अक्षस्थौल्यं गतत्वत्स्थविष्ठा अभितो वर्षधारा मुमुचुः ॥ ११ ॥
व्यदृश्यंत वर्तमानाः समुद्राः समीरवेगेनोर्मयः तरंगाः तैर्भूतलं ग्रसंतः उग्रा नक्रा येषु महाभया आव
र्ता येषु गंभीरा घोषा येषु ते च ॥ १२ ॥ श्रीकृष्णाय नमः ॥

श्री॰ भा॰ द्वा॰ टी॰ २८

आत्मना सह जरायुजादि चतुर्विधं जगदंतर्बहिश्चोपतापितं वीक्ष्य क्ष्मां च जलाप्लुतां वीक्ष्य मुनिः समत्रस
त् भयं प्राप केनोपतापितं॥ अद्भिः कथंभूताभिः अतिक्रांता द्यौर्याभिः खरैश्च सूर्यरश्मिभिः वायुभिर्वे
निर्घोषैः शतह्रदाभिश्च विद्युद्भिः दीर्घमार्षं कंदैतुमारेण॥ १७॥ प्रभंजनेन वायुना आघूर्णितं प्रकंपितं वाः
उदकं यस्मिन्सः अप्यधात् छादयामास समं सह॥ १८॥ सक्ष्मांतरिक्षं भूम्यंतरिक्षस्य प्राणिसहितं सदि

अंतर्बहिश्चाद्भिरतिद्युभिः खरैः शतह्रदाभीरुपतापितं जगत्॥ चतुर्विधं वीक्ष्य सहात्म
ना मुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत्॥ १७॥ तस्यैवमुद्वीक्षत ऊर्मिभीषणः प्रभं
जनाघूर्णितवार्महार्णवः॥ आपूर्यमाणो वरषद्भिरंबुदैः क्ष्मामप्यधाद्द्वीपवर्षाद्रिभिः स
मं॥ १८॥ सक्ष्मांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सहदिग्भिराप्लुतम्॥ स एक एवो
र्वरितो महामुनिर्बभ्राम विक्षिप्य जटा जडांधवत्॥ १९॥ क्षुत्तृट्परीतो मकरैस्तिमिंगि
लैरुपद्रुतो वीचिनभस्वताहतः॥ तमस्यपारे पतितो भ्रमन्दिशो न वेद खं गां च परिश्रमे
षितः॥ २०॥ क्वचिन्मग्नो महावर्ते तरलैस्ताडितः क्वचित्॥ यादोभिर्भक्ष्यते क्वापि स्वयमन्यो
न्यघातिभिः॥ २१॥ क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं भयम्॥ क्वचिन्मृत्युमवाप्नो
ति व्याध्यादिभिरुतार्दितम्॥ २२॥ अयुतायुतवर्षाणां सहस्राणि शतानि च॥ व्यतीयु
र्भ्रमतस्तस्मिन्विष्णुमायावृतात्मनः॥ २३॥ स कदाचिद्भ्रमंस्तस्मिन्पृथिव्याः ककुदि द्वि
जः॥ न्यग्रोधपोतं ददृशे फलपल्लवशोभितम्॥ २४॥

वं स्वर्गं स देवसहितं भागणो ज्योतिर्गणः [illegible] नैः सह दि[illegible] विक्षिप्य विकीर्य॥ १९॥ परिश्रमेणेषितः ग
तः व्याप्तः इत्यर्थः ईषु गतौ इति धातोः अस्माद्धा[illegible]॥ २०॥ [illegible] अन्योन्यघा[illegible]भिः तद्वत् [illegible]याद्भिः॥ २२॥ राम
विष्णुमायावृतात्मनः इति सनत्कुमारदृष्टदानिम्यर्थः [illegible]॥ २३॥ ककुदि उन्नतप्रदेशे न्यग्रोधपोतं कोमलं वटं ॥ २४॥ २८

तस्य ईशानदिक्शाखायां शिशुमपि ॥ २१ ॥ श्रीमद्रम्यं वदनपंकजं यस्य तं कंबुवत् त्रिरेखा ग्रीवा यस्य
तं महोरस्कं विशालवक्षसं सुनासं शोभननासायुक्तं सुंदरे भ्रुवौ यस्य तं ॥ २२ ॥ श्वासैः कंपमानैः एजंतः कं
पमानाः अलकालिभिराभातं शोभितं कंबुवत् ॥ शुंगं नवदलयोः श्रीः ययोः तौ कंबुश्रियौ तन्यौ कर्णौ यस्य दाडिमव
द्यस्य तं विद्रुमवत् आभातया ईषत् शोणायितं सुधातुल्यं स्मितं यस्य तं ॥ २३ ॥ पद्मगर्भवत् आरुणमंता

प्रागुत्तरस्यां शाखायां तस्यापि दक्षिणे शिशुं ॥ ध्यायेत् पर्णपुटके ग्रसंतं प्रभया नमः ॥ २१ ॥ म
हामरकतश्यामं श्रीमद्वदनपंकजम् ॥ कंबुग्रीवं महोरस्कं सुनासं सुंदरभ्रुवम् ॥ २२ ॥ श्वासै
जदलकाभातं कंबुश्रीकर्णदाडिमम् ॥ विद्रुमाधरभासिद्धमक्रोणायितसुधास्मितम् ॥ २३ ॥
पद्मगर्भारुणापांगं हृद्यहासावलोकनम् ॥ श्वासैजद्वलिसंविग्ननिम्ननाभिदलोदरम् ॥ २४
चार्वंगुलिभ्यां पाणिभ्यामुन्नीय चरणांबुजम् ॥ मुखे निधाय विप्रेंद्रो धयंतं वीक्ष्य विस्मितः ॥
२५ ॥ तद्दर्शनाह्रीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनांबुजः ॥ प्रहृष्टरोमाद्भुतभावशंकि
तः प्रष्टुं पुरस्तं प्रससार बालकम् ॥ २६ ॥

न्नु ईषत् ॥ अरुणवर्णौ नेत्रांतौ यस्य तं ॥ हृद्यो हासो यस्मिन् तत् अवलोकनं यस्य तं ॥ श्वासैः एजंत्यः चलंत्यो
वलयः त्रिवल्यः ताभिः संविग्नाः चंचलानि निम्ना गंभीरा नाभिर्यस्मिन् तत् दलवत् अश्वत्थपत्रसंकाशं उदरं य
स्य तं ॥ २४ ॥ चार्वंगुलयो ययोः ताभ्यामुन्नीय अग्रे कृत्वा धयंतं पिबंतं ॥ २५ ॥ हृत्पद्मं च विलोचनांबुजे च
प्रोत्फुल्लानि विकसितानि यस्य सः ॥ अद्भुतभावमस्याश्चर्यरूपं तेन शंकितः सन्नपि प्रष्टुं पुरः प्रससार समीपं ग
तः ॥ २६ ॥

उदः इदं जगत यथा पुरा प्रलयात्पूर्वं न्यस्तं विन्यस्तं दृष्ट्वा च अतीव विस्मितः सन् अमुह्यत् ॥ २७ ॥ कृत्स्नशो द
र्शनं प्रपंचयति ॥ खमित्यादिना ककुभो दिशः पुराणि आकरांश्च खेटान् कार्षिकग्रामान् व्रजान् ॥ गोकुलानि
आश्रमांश्च वर्णांश्च तेषां वृत्तीश्च अपश्यत् ॥ २८ ॥ नानायुगानि कल्पांश्च कल्पयंति तैर्वा कल्प्यत इति तथा
तं कालं च ॥ सदिव परमार्थवदेव स्वभासितं तेनैव ॥ २९ ॥ वटं च तोकं च वीक्ष्यत इत्यपि प्रेमसुधायाः स्मितं यस्य

तावच्छिशोर्वै श्वसितेन भार्गवः सोंतः शरीरं मशको यथाविशत् ॥ तत्राप्यदो न्यस्तमचष्ट
कृत्स्नशो यथा पुराऽमुह्यदतीव विस्मितः ॥ २७ ॥ खं रोदसी भगणानद्रिसागरान्द्वीपान्सवर्षा
न्ककुभः सुरासुरान् ॥ वनानि देशान्सरितः पुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः ॥ २८ ॥
महांति भूतान्यथ भौतिकान्यसौ कालं च नानायुगकल्पकल्पनम् ॥ यत्किंचिदन्यद्व्यवहार
कारणं ददर्श विश्वं सदिवावभासितम् ॥ २९ ॥ हिमालयं पुष्पवहां च तां नदीं निजाश्रमं यत्र
ऋषीनपश्यत ॥ विश्वं विपश्यन् श्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ॥ ३० ॥ त
स्मिं पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानं ॥ तोकं च तत्प्रेमसुधास्मितेन निरी
क्षितोऽपांगनिरीक्षणेन ॥ ३१ ॥ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि ॥ अभ्ययादति
संक्लिष्टः परिष्वक्तुमधोक्षजं ॥ ३२ ॥ तावत्स भगवान्साक्षाद्योगाधीशो गुहाशयः ॥ अंत
र्दधे ऋषेः सद्यो यथेहानीशनिर्मिता ॥ ३३ ॥

क्षेनापांगनिरीक्षणेन निरीक्षितः सन् ॥ ३१ ॥ अथ तं बालकमधोक्षजं परिष्वक्तुमभ्ययादिति द्वयोरन्व
यः ॥ कथंभूतं [illegible] नेत्राभ्यां हृदि धिष्ठितं ध्यानम् ॥ ३२ ॥ तावत्परिष्वंगात्प्रागेव ऋषेः [illegible] तत्स्थानात् अंतर्हितो ब
भूव ॥ उद्यमवैफल्ये दृष्टांतः ॥ अनीशस्य निर्दैवस्य नरेण निर्मिता ईहा क्रिया यथा व्यर्था इति ॥ ३३ ॥

श्रीराम ॥ श्रीगोपाल ॥

नमंतर्हितं श्रीभगवंतं अनुवदः सलिलं लोकसंप्लवं आश्रमं निरोधायांतर्हितः स च स्वाश्रमे यथापूर्वं स्थित
इति ॥ ३४ ॥ इति श्रीभावार्थदीपिकायां द्वादशे नवमः ॥ ९ ॥ दशमे शिवसंगतस्तुवेत्स्तुष्टोव
मुनेर्वरात् ॥ तेन स्वाकमलनिष्ठीत्या समाभाष्यसभाजयत् ॥ ज्ञानकाशयाज्ञानवतस्तुकाशमानयामद्भ
जनं विनाविद्धं तापिय स्वतव मायया ज्ञानिनो वयमिति मुह्यं हंकारेण प्रसंतीत्यर्थः ॥ १ ॥ श्रीनारा
यणः एवं स्वमायादर्शनमंतं शिवरूपेण संलयामास तदाह मिति तमेवमित्यादिना निभृतात्मानं

तमन्वेष्य वटोत्पन्नं सलिलं लोकसंप्लवः ॥ निरोधायितस्तदा स्वाश्रमे पूर्ववत्स्थितः
३४ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे श्रीभगवन्मायादर्शनं नाम नवमोऽध्यायः ॥
९ ॥ श्रीसूत उवाच ॥ स एवमनुभूयेदं नारायणविनिर्मितं वैभवं योगमायाया
स्तमेव शरणं ययौ ॥ १ ॥ मार्कंडेय उवाच ॥ प्रपन्नोस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे
यन्मायया हि विबुधा मुह्यंति ज्ञानकाशया ॥ २ ॥ सूत उवाच ॥ तमेवं निभृतात्मा
नं वृषेण दिवि पर्यटन् ॥ रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ॥ ३ ॥ अथोमा तमृषिं
वीक्ष्य गिरिशं समभाषत ॥ पश्येमं भगवन्विप्रं निभृतात्मेंद्रियाशयं ॥ ४ ॥ निभृतो
दझषव्रातो वातापाये यथार्णवः ॥ कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ॥ ५ ॥
श्रीभगवानुवाच ॥ नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिं परां भगव
ति लब्धवान्पुरुषेऽव्यये ॥ ६ ॥

समाहितचित्तं रुद्राण्या भवान्या ॥ ३ ॥ निभृता निश्चला आत्मेंद्रियाशयाः देहेंद्रियमनांसि यस्य तं
निभृतं निश्चलमुदकं झषव्रातश्च यस्मिन्सः संसिद्धिफलं साक्षात्कुरु प्रकटीकुरु यतो भवान्सिद्धि
दः ॥ ५ ॥ आशिषः अभ्युदयलक्षणा उत अपि ॥ अत्र हेतुः भक्तिमिति ॥ ६ ॥

श्री· भा·ह्री· टी· १·

संवदिष्यामः संवादं करिष्यामः॥ सात्वतां गतिस्त्वं हे नः ईशान इति॥ ८॥ हृदाधियो नः कारणस्वरूपत्वा
द्योयेनसः॥ ९॥ न केवलं बहिरेवात्मन्यपि प्राप्तं शिवं विचक्ष्य विस्मितः कथं प्राप्तं सहसा अकस्मादे
व हृदि भातं तं डिंडिमत्रिशूलगजचर्माधारयतीति तं त्रीणि श्रुतीनि यस्य तं शूलादिभिः सह अक्षमालादी

अथापि संवदिष्यामो भवान्येतेन साधुना॥ अयं हि परमो लाभो नृणां साधुसमागमः
सूत उवाच॥ इत्युक्त्वा तमुपेयाय भगवान् सात्वतां गतिः॥ ईशानः सर्वविद्यानामीश्व
रः सर्वदेहिनाम्॥ ८॥ तयोरागमनं साक्षादीशयोर्जगदात्मनोः॥ नवेद रुद्धधीवृत्ति
रात्मानं विश्वमेव च॥ ९॥ भगवांस्तदभिज्ञाय गिरिशो योगमायया॥ आविशत्तद्गुहाका
शं वायुः छिद्रमिवेश्वरः॥ १०॥ आत्मन्यपि शिवं प्राप्तं तडित्पिंगजटाधरं॥ त्र्यक्षं दशभु
जं प्रांशुमुद्यंतमिव भास्करम्॥ ११॥ व्याघ्रचर्मांबरं शूलधनुरिष्वसिचर्मभिः॥ अक्षमा
लाडमरुककपालपरशुं सह॥ बिभ्राणं सहसा भातं विचक्ष्य हृदि विस्मितः॥ १३॥ किमि
दं कुत एवेति समाधेर्विरतो मुनिः॥ नेत्रे उन्मील्य ददृशे सगणं सोमयागतम्॥ १४॥ रुद्रं
त्रिलोकैकगुरुं ननाम शिरसा मुनिः॥ तस्मै सपर्यां व्यदधात् सगणाय सहोमया॥ १५॥ स्वा
गतासनपाद्यार्घ्यगंधस्रग्धूपदीपकैः॥ १६॥ आह त्वात्मानुभावेन पूर्णकामस्य ते विभो
करवाम किमीशान येनेदं निर्मितं जगत्॥ १७॥ नमः शिवाय शांताय सत्त्वाय प्रमृडाय
च॥ रजोजुषेथ घोराय नमस्तुभ्यं तमोजुषे॥ १८॥ सूतः॥ एवं स्तुतः स भगवानादिदे
वः सतां गतिः॥ परितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत॥ १९॥

निबिभ्राणमित्यन्वयः अक्षमालादीनां द्वंद्वैक्यं॥ १२॥ विस्मयपूर्वकं बहिर्देशेन माह॥ किमिदमिति सो
मया उमया सह आगतं रुद्रं ददृशे॥ १४॥ ननामेति नाम॥ १५॥ पूर्णकामत्वमस्य त्वन्नक्रियेन त्वया जगन्निर्मि राम
तं भवतीति॥ १७॥ निर्गुणत्वेन त्रिगुणत्वेन च नमस्करोति नमः शिवायेति निर्गुणाय सत्त्वाय सत्त्वाधिष्ठा ६
त्रे अक्षमतएव मृडतीति रजस्तमयतिनयातस्मै॥ १८॥

नोत्पन्नः त्रयः ब्रह्मविष्णुमहेश्वराः यत एभ्यः तेवयं ॥ १८ ॥ वरदानादिना भवत्सेवैवास्माभिः क्रियते ॥ यत
नृपमृतं जगद्वंद्यत्वात भवतामितिनिब्राह्मणान् लीनिब्राह्मणाइत्यादिना ये साधवः सदाचाराः शांताः मत
सरादिरहिताः निष्कामा निःसंगाः चकेवलंनेत्यर्थ ॥ किंच अहंचेत्यादिना ॥ २० ॥ पूज्यत्वमत्वेहेतुत्वंनस्मा
हमेति ॥ अण्वेवपि अणुमात्रमपि चक्षते पश्यंति तेन युष्मान्वयं भूत्वा च ईमहि भजेम ॥ २१ ॥ ब्राह्मणेभ्यः

श्रीभगवानुवाच ॥ वरंवृणीष्वनःकामंवरदेशावयंत्रयः ॥ अमोघंदर्शनंयेषांमर्त्योयद्विंदतेमृ
तम् ॥ १८ ॥ ब्राह्मणाःसाधवःशांतानिःसंगाभूतवत्सलाः ॥ एकांतभक्ताअस्मास्तुनिर्वैराःसम
दर्शिनः ॥ १९ ॥ सलोकालोकपालास्तान्वंदंत्यर्चंत्युपासते ॥ अहंचभगवान्ब्रह्मास्वयंचहरि
रीश्वरः ॥ २० ॥ नतेमय्यच्युतेजेचभिदामण्वपिचक्षते ॥ नात्मनश्चजनस्यापितद्युष्मान्वय
मीमहि ॥ २१ ॥ नह्यम्मयानितीर्थानिनदेवाश्चेतनोज्झिताः ॥ तेपुनंत्युरुकालेनयूयंदर्शनमा
त्रतः ॥ २२ ॥ ब्राह्मणेभ्योनमस्यामोयेस्मद्रूपंत्रयीमयम् ॥ बिभ्रत्यात्मसमाधानंतपःस्वाध्या
यसंयमैः ॥ २३ ॥ श्रवणाद्दर्शनाद्वापिमहापातकिनोपिवः ॥ शुध्येरन्नंत्यजाश्चापिकिमुसंभा
षणादिभिः ॥ २४ ॥ श्रीशुकः ॥ इतिचंद्रललामस्यधर्मगुह्योपबृंहितं ॥ वचोमृतायनमृषिर्ना
तृप्यत्कर्णयोःपिबन् ॥ २५ ॥ सचिरंमाययाविष्णोःभ्रामितःकर्षितोभृशं ॥ शिववागमृत
ध्वस्तक्लेशपुंजस्तमब्रवीत् ॥ २६ ॥

ब्राह्मणान् आत्मसमाधानं चित्तैकाग्र्यं तपः आलोचनं स्वाध्यायः स्वशाखाध्ययनं संयमाः वागादिनिय
माः तैः ॥ २३ ॥ किंच श्रवणादित्यादि ॥ २४ ॥ चंद्रोललामो भूषणं यस्य तस्य धर्मरहस्ययुक्तं अमृतास्वादं व
चः कर्णाभ्यां पिबन् नातृप्यत् ॥ अलं इति नामन्यत कर्णयोः अमृतायनं इति वान्वयः ॥ २५ ॥ शिवस्य वागेवा
मृतं तेन ध्वस्ताः क्लेशपुंजा यस्य सः ॥ २६ ॥ ॥ श्रीरामाय नमः ॥ ॥

इयं लीला दुर्विभाव्या ॥ अवितर्क्या ॥ यद्यया ईशितव्यानि स्वनियम्यानि भूतानि जगदीश्वराः स्वयं नमंति स्तुवं
ति चेति ॥ २७ ॥ अथवा लोकसंग्रहमात्रमेतदित्याह ॥ धर्ममिति ॥ प्रवक्तारोपि यत्स्वयं देहिनां धर्ममाचरंति
२८ ॥ नन्वेतत्स्वभावतिरस्कारः कथं मया क्रियते ॥ तत्राह नेति एतावता लोकसंग्रहमात्रेण तैर्नमनादिभिः
कथंभूतैः स्वमायामयी वृत्तिर्येषु तैः ॥ श्रीभगवतो मायिनस्तत्त्वानुभावो न दुष्येत ॥ यतः प्रसिद्धस्य मायि
नः कुहकं कपटं यथा तथैतानि नमनादीनि अनतत्त्वस्य यथा कुहकेनात्मानुभावो दुष्यत इति तद्वत् ॥ २९

ऋषिरुवाच ॥ अहो ईश्वरस्य चर्येयं दुर्विभाव्या शरीरिणाम् ॥ यन्नमंतीशितव्यानि स्तुवंति जग
दीश्वराः ॥ २७ ॥ धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनाम् ॥ आचरंत्यनुमोदंते क्रियमाणं
स्तुवंति च ॥ २८ ॥ नैतावता भगवतः स्वमायामयवृत्तिभिः ॥ न दुष्येतानुभावस्तैर्मायिनः
कुहकं यथा ॥ २९ ॥ सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ॥ गुणैः कुर्वद्भिराभाति कर्तेव
स्वप्नदृग्यथा ॥ ३० ॥ तस्मै नमो भगवते त्रिगुणाय गुणात्मने ॥ केवलायाद्वितीयाय गुरवे
ब्रह्ममूर्तये ॥ ३१ ॥ कं वृणीत वरं भूमन्वरेण्याद्वरदर्शनात् ॥ यद्दर्शनात्पूर्णकामः सत्यकामा
पुमान्भवेत् ॥ ३२ ॥ वरमेकं वृणेथापि पूर्णकामाभिवर्षणात् ॥ भगवत्यच्युते भक्तिं तत्परेषु
तथा त्वयि ॥ ३३ ॥ श्रीसूत उवाच ॥ इत्यर्चितोभिष्टुतश्च मुनिना सूक्तया गिरा ॥ तमाह
भगवान् शर्वः शार्वया चाभिनंदितः ॥ ३४ ॥ श्रीराम ॥

छ्येतेति पाठे न कारस्य हृद्यांतोनुषंगः ॥ २९ ॥ माया वेष्टितं प्रपंच इति ॥ सृष्ट्वेति ॥ स्वप्नदृग्यथा स्वेन्य विद्या
वेष्टितेद्दृष्टांत ॥ ३० ॥ त्रिगुणत्वेन न जीववत्तदभिभूताय किंतु गुणानामात्मने नियंत्रे ॥ ३१ ॥ वरेण्याद्वृ
णीयतद्भक्षे तत्राह कमिति वरं वरदर्शनं यस्य तस्मात् त्वत्तः परं वरं न वृणे यस्य तव दर्शनात्पूर्णकामः सर्वा
नंदसंदोहरूपः सत्यकामः यथेष्टं प्राप्नुः सर्वानंदः ॥ ३२ ॥ वरदानाय स्वयमेव प्रवृत्तः शार्वया उमया
चाभिनंदितः अनुमोदितः सन् आह ॥ ३४ ॥ श्रीकृष्ण ॥

कामोयंसर्वोपिसत्यस्तत्रपुण्यंयशः इत्यादिब्रह्मवर्चस्विन्नस्तेभूयादित्युत्तरेणान्वयः यतस्त्वमधोक्षजेभक्तिमा
न्॥३५॥ तस्यकर्मैतत्पश्चादमुनेः पुरानुभूतंश्रीभगवन्मायावैभवंतत्कथयन्॥३७॥ अवाप्तोयोगमहिमाये
नसः॥३८॥ एतन्मार्कंडेयस्यचरितंतेनानुभूतंचश्रीभगवन्मायावैभवंते,नुवर्णितं॥३९॥ नन्वेवमप्यसमर
कुलीयस्त्रस्यास्यसप्तकल्पायुष्ट्वंदृष्टेदृश्यमानंविरुद्धमेवतत्राह॥ एतन्मार्कंडेयेनानुभूतंश्रीभगवन्मा

कामस्तेयंमहर्षेत्वंभक्तिमांस्त्वमधोक्षजे॥ आकल्पांताद्यशःपुण्यमजरामरतातथा॥३५॥
ज्ञानंत्रैकालिकंब्रह्मन्विज्ञानंचविरक्तिमत्॥ ब्रह्मवर्चस्विनोभूयात्पुराणाचार्यतास्तुते॥३६॥
सूत उवाच॥ एवंवरान्समुनयेदत्वागात्र्यक्षईश्वरः॥ देव्यैतत्कर्मकथयन्ननुभूतंपुरामु
नेः॥३७॥ सोप्यवाप्तमहायोगमहिमाभार्गवोत्तमः॥ विचरत्यधुनाप्यद्धाहरावेकांततां
गतः॥३८॥ अनुवर्णितमेतत्तेमार्कंडेयस्यधीमतः॥ अनुभूतंभगवतोमायावैभवमद्भुत
म्॥३९॥ एतत्केचिदविद्वांसोमायासंसृतिमात्मनः॥ अनाद्यावर्तितंनृणांकदाचित्कंप्र
वदंते॥४०॥ यएवमेतद्भृगुवर्यवर्णितंरथांगपाणेरनुभावभावितम्॥ संश्रावयेत्संशृ
णुयादुतावुभौतयोर्नकर्माशयसंसृतिर्भवेत्॥४१॥

यावैभवंनानाकल्पसृष्टंकदाचित्कं॥ ईश्वरेच्छयातस्यैवाकस्मिकंनतुसर्वसाधारणं एतत्केचिदनादि
बहुकालंआवर्तितंदेवपुरुषसहस्रदृश्यमानेनपुनःपुनःपरिवर्तितंप्रवर्त्ततेनृणांसंसृतिःसर्गप्रलया
दिलक्षणंआत्मनोभगवतोमायाद्भुत्वेवमविद्वांसः॥ विद्वांसस्तुमायाशिशोःश्वासोछ्वासाभ्यांसप्तकल्पा
नंतदुदरप्रवेशनिर्गमतःसप्तकल्पत्वंतत्क्षणमात्रेणेतिवदंतिअतोनविरोधइत्यर्थः॥४०॥ संशृणुयात्
ततःसंश्रावयेद्वाश्रोतावुभौतयोःकर्मवासनाकृतासंसृतिर्नभवेदिति॥४१॥ ॥ ॥

श्री० भा० द्वा० टी० ३२

इति श्रीभावार्थदीपिकायां द्वादशे टीकायां दशमः ॥१०॥ एकादशे तु पूजार्थं महापुरुषवर्णनम् ॥ स्वैर्व्यूहस्य चाख्या
नं प्रतिमासं पृथक् पृथक् ॥ येनामर्त्यत्वमापन्नो मर्त्योऽसौ भागवोत्तमः ॥ तं पृच्छति क्रियायोगं सांगोपांगादिक
ल्पितम् ॥ १ ॥ अथेति हे भागवत मुख्य भवान् ॥ समस्ततन्त्रसिद्धान्तेन तत्त्ववित् ॥१॥ पृष्टमसमाह तांत्रिका इति परिच
र्यायां उपासनायां विषये केवलस्य वैनस्य पत्युरंगानि पादादीनि उपांगानि गरुडादीनि आयुधानि सुदर्श
नादीनि आकल्पाः कौस्तुभादयः ॥ तेषां द्वंद्वैकवत्तद्यथाकल्पयंति यैश्च तत्त्वैः कल्पयंति तन्नो वर्णय ॥ ३

इति श्रीभागवते महापुराणे द्वादशस्कंधे दशमोऽध्यायः ॥ १० ॥ शौनक उवाच ॥ अथेममर्थं पृच्छामो भ
वंतं बहुवित्तमम् ॥ समस्ततंत्रराद्धांते भवान्भागवत तत्त्ववित् ॥ १ ॥ तांत्रिकाः परिचर्यायां के
वलस्य श्रियः पतेः ॥ अंगोपांगायुधाकल्पं कल्पयंति यथा च यैः ॥ २ ॥ तन्नो वर्णय भद्रं ते क्रि
यायोगं बुभुत्सताम् ॥ येन क्रियानैपुणेन मर्त्यो यायादमर्त्यताम् ॥ ३ ॥ सूत उवाच ॥ न
मस्कृत्य गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि ॥ याः प्रोक्ता वेदतंत्राभ्यामाचार्यैः पद्मजादिभिः ॥ ४
मायाद्यैर्नवभिस्तत्त्वैः सविकारमयो विराट् ॥ निर्मितो दृश्यते यत्र सचित्के भुवनत्रयं ॥ ५ ॥

गुरून्परेशानम्य तत्प्रसादस्यापेक्षत्वात्तन्नमस्कारपूर्वकमाह ॥ नमस्कृत्येति विभूतीर्विराड्विग्रहाद्याः ॥ ४ ॥ अंगा
दिकल्पानां भूषणादिभिः दर्शयितुं प्रथमं तावद्यथाकल्पयंतीति प्रश्नस्योत्तरं राजरूपेणोत्पन्नं वक्ष्यं विराड्वि
ग्रहमाह ॥ मायाद्यैः प्रकृतिसूत्रमहदहंकारपंचतन्मात्रैर्नवभिस्तत्त्वैः विकारा एकादशेंद्रियाणि पंचभू
तानीति षोडशात्मको विराट् स प्रसिद्धो निर्मितो यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते अ
नेनांगादिकल्पना सालम्बा दर्शिता ॥ ५ ॥ ॥ श्रीरामाय नमः ॥ राम ३२

एतद्वै पौरुषं रूपं पुरुषस्य वैराजस्य रूपमेवेश्वरेणाधिष्ठितत्वात् ॥ तदेतद्विवक्षया रूपमुच्यते ॥ अंगकल्पना
माह भूपाद ... निस्रादिभिः त्रिभिः भूराद्यवयवादेन श्रीभगवत्पादादिभावना विधीयते ॥६॥ प्रजननं मे
ढ्रं अपानः पायुः ॥७॥८॥ अनुक्रममव्यक्तदेवमूर्त्तमित्याह ॥ यावानयं प्रसिद्धपुरुषः स्वमानतः सप्तवितस्ति

एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः ॥ नाभिः सूर्यो चक्षुषी नासिके वायुः कर्णौ दिशः प्र
भोः ॥६॥ प्रजापतिः प्रजननमपानो मृत्युरीशितुः ॥ तद्बाहवो लोकपाला मनश्चन्द्रो भ्रु
वौ यमः ॥७॥ लज्जोत्तरोऽधरो लोभो दन्ता ज्योत्स्ना स्मयो भ्रमः ॥ रोमाणि भूरुहा भूम्नो मे
घाः पुरुषमूर्धजाः ॥८॥ यावानयं वै पुरुषो यावत्या संस्थया मितः ॥ तावानसा
वपि महापुरुषो लोकसंस्थया ॥९॥ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्य
जः ॥ तत्प्रभा व्यापिनी साक्षात् श्रीवत्समुरसा विभुः ॥१०॥ स्वमायां वनमालाख्यां
नानागुणमयीं दधत् ॥ वासश्छन्दोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरम् ॥११॥ बिभर्ति सां
ख्यं योगं च देवो मकरकुण्डले ॥ मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरम् ॥१२॥ अव्या
कृतमनन्ताख्यमासनं यदधिष्ठितः ॥ धर्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते ॥१३॥
ओजः सहो बलयुतं मुख्यतत्त्वं गदां दधत् ॥ अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनम् ॥१४॥
नभोनिभं नभस्तत्त्वं वासिचर्म तमोमयम् ॥ कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिं
॥१५॥

संस्थयावयवसन्निवेशेन मितः ॥९॥ भूषणादीन्याह ॥ कौस्तुभेत्यादिना स्वात्मज्योतिः शुद्धजीवचैत
न्यं यत्तस्य कौस्तुभस्य प्रभा तामेव श्रीवत्सं बिभर्त्ति ॥१०॥ त्रिमात्रं प्रणवं त्रिवृत्स्वरं ॥११॥ पारमेष्ठ्यं पदं
ब्रह्मलोकं ॥१२॥ अव्याकृतं प्रधानं यत् ॥ अधिष्ठितः अधिष्ठाय स्थितः ॥ तदासनरूपं पद्मं सत्त्वं सत्त्वगु
णः ॥१३॥ मुख्यतत्त्वं प्राणतत्त्वं प्राणो वै मुख्य इति श्रुतेः ॥ दरवरं शंखं ॥१४॥

श्री·
भा·द्वा·
टी·
२२

इंद्रियाणि शराण्याकूत्याकूतीरस्य स्यंदनम् ॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतामित्यस्य आ-
कूतीः क्रियाशक्तियुक्तं मनः अस्य रथस्याभिव्यक्तिः बहिरभिव्यक्तं रूपं मुद्रया धृतया अर्थक्रियात्मतां
वरदाभयदादिरूपत्वं बिभर्तीति तन्मुद्रया तत्तया भावयेदित्यर्थः ॥ १६ ॥ मंडलं देवयजनं देवपूजा
भूमिं सूर्यमंडलत्वेन भावयेदित्यर्थः ॥ अंतर्वेदि मंडलं वा दीक्षा संस्कार आत्मनः गुरुदत्तां मंत्रदीक्षा-
मेव आत्मनस्तत्पूजायोग्यतां भावयेदित्यर्थः ॥ परिचर्येति श्रीभगवतः तां परिचर्यां स्वस्य सकलपा-
पक्षयायैवं रूपां भावयेदित्यर्थः ॥ १७ ॥ पूर्वमासनपद्ममुक्तं तदाकारमंतःस्थं पद्ममाह ॥ भगवा-

इंद्रियाणि शराण्याकूतीरस्य स्यंदनम् ॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रिया-
त्मताम् ॥ १६ ॥ मंडलं देवयजनं दीक्षा संस्कारमात्मनः ॥ परिचर्या भगवतो ह्यात्मनो दु-
रितक्षयः ॥ १७ ॥ भगवान्भगशब्दार्थं लीलाकमलमुद्वहन् ॥ धर्मं यशश्च भगवांश्चा-
मरव्यजनेऽभजत् ॥ १८ ॥ आतपत्रं तु वैकुंठं द्विजा धामाकुतोभयम् ॥ त्रिवृद्वेदः सुपर्णा-
ख्यो यज्ञं वहति पूरुषम् ॥ १९ ॥ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ॥ विष्व-
क्सेनस्तंत्रमूर्तिर्विदितः पार्षदाधिपः ॥ २० ॥ श्रीराम ॥

नितिश्रीभगशब्दार्थमैश्वर्यादि षाड्गुण्यं ॥ १८ ॥ हे द्विजाः एकवचनांतो वा पाठः अकुतोभयं कैवल्यं धा-
म गृहं समभजत ॥ यद्वा वैकुंठस्य विशेषणं ॥ अकुतोभयं यद्धामेति ॥ त्रिवृत् ऋग्यजुः सामरूपो वेदः
सुपर्णो गरुत्मान् त्रिवृत् शिर इत्यादिमंत्रलिंगात् ॥ यज्ञं यज्ञस्वरूपं पुरुषं यज्ञो वै विष्णुरिति श्रुतेः
१९ ॥ अनपायिनी श्रीहरेः शक्तिः तत्र हेतुः साक्षादात्मनः स्वरूपस्य चिद्रूपत्वात् तस्यास्तदभेदादित्य-
र्थः तंत्रमूर्तिः पंचरात्रागमरूपः येऽणिमादयो गुणाः ॥ ते हरेर्द्वारपाला नंदादयः ॥ राम
२२

तस्यैव चतुर्व्यूहोपासनमाह ॥ श्रीवासुदेवादिशब्दैः पुरुषः श्रीनारायण एव स्वयं मूर्तिभेदैश्चतुर्व्यूह इ
त्यभिधीयते ॥ २१ ॥ तस्यैवाध्यात्मनि चतुर्धोपासनमाह ॥ स एव भगवान्विश्वादिशब्दैर्वृत्तिभिः जाग्रदा
द्यवस्थाभिः परिभाव्यते ॥ तद्धेतूनाह ॥ अर्थो बाह्याः इन्द्रियं मनः ॥ आशयं तदुभयसंस्कारयुक्त
मज्ञानं ज्ञानं त्रितयसाक्षीति ॥ २२ ॥ उक्तचतुर्व्यूहद्वयोपासने विपूर्वोक्तामंगाद्युपासनमाह ॥ अंगेति
अंगादिभिरुपलक्षितो हरिः भगवान्वासुदेवादिचतुर्मूर्तिभिः सन् ॥ विश्वादिचतुष्टयं बिभर्ति स्म

नंदादयोष्टौ द्वाःस्थाश्चाणिमाद्या हरेर्गुणाः ॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्व
यम् ॥ अनिरुद्ध इति ब्रह्मन्मूर्तिव्यूहोभिधीयते ॥ २१ ॥ स विश्वस्तैजसः प्राज्ञस्तुरीय इ
ति वृत्तिभिः ॥ अर्थेन्द्रियाशयज्ञानैर्भगवान्परिभाव्यते ॥ २२ ॥ अंगोपांगायुधाकल्पैः
भगवांस्तच्चतुष्टयम् ॥ बिभर्ति स्म चतुर्मूर्तिर्भगवान्हरिरीश्वरः ॥ २३ ॥ द्विजऋषभ स एष
ब्रह्मयोनिः स्वयंदृक्स्वमहिमपरिपूर्णो मायया च स्वयैतत् ॥ सृजति हरति पातीत्या
ख्ययानावृताक्षो विवृत इव निरुक्तस्तत्परैरात्मलभ्यः ॥ २४ ॥

विश्वादिभावेपि तन्नियंतुः तस्य न तु जीवत्वमित्याह ॥ विश्वादिचतुष्टयं बिभ्रदपि श्रीभगवानीश्वर एवेति
२३ ॥ तस्य ब्रह्मादित्रिमूर्त्तितामाह ॥ द्विजर्षभेति स एष एव भगवान्ब्रह्मयोनिर्वेदस्य कारणमित्यादिहे
तुत्रयं वक्तुं तेन भेदाभावेपि स्वगतमायया सृजति हरति पातीति कृत्वा आख्यायो ब्रह्मादिरूपया अना
वृताक्षः अनाच्छन्नज्ञानोपि विवृत इव भिन्न इव निरुक्तः शास्त्रेषु न तु भिन्नः अत्र विद्वदनुभवं प्रमाणय
ति ॥ यत तत्परैरात्मत्वेनैव लभ्यत इति ॥ २४ ॥ ॥ श्रीरामाय नमः ॥

श्री·
भा·हा·
टी·
५४

यस्येदमुपासनमुक्तं तं श्रीकृष्णं प्रार्थयते कृष्ण इति अन्तेन तस्य सर्वे वृष्णयः अष्टश्रवनिहुता ये राजन्याः
तेषां वंशस्य दहन अनपवर्गमती एवं वीर्यं यस्य गोपवनितानां व्रजाः समूहाः भृत्यानां रहाद्यः तै
गीतं तीर्थभूतं श्रवः कीर्तिर्यस्य श्रवणमेव मंगलं यस्य ॥ २५ ॥ एतज्जपमात्रस्यापि ब्रह्मज्ञानफलमाह
य इति काल्ये उषाकाले तच्चित्तः प्रयतः शुचिः विश्वसृज्जप्त्वा गुहाशयं हृदिस्थं ब्रह्म पश्यति ॥ २६ ॥ मंडले दे
वयज्ञनमित्युक्ता वृद्धिमागतः मूर्तिर्विरहस्य संगेन विभूतीस्त्र पृच्छन्ते ॥ शुक इति पंचमेयदाह ॥ तथा
न्यच ऋषयो गंधर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्तैतादि तीर्थश्र

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ॥ गोविंद गोपवनि
ताव्रजभृत्यगीततीर्थश्रवः श्रवणमंगल पाहि भृत्यान् ॥ २५ ॥ य इदं कल्य उत्थाय महा
पुरुषलक्षणम् ॥ तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयम् ॥ २६ ॥ शौनक उ ॥ शुको य
दाह भगवान्विष्णुरात्राय शृण्वते ॥ सौरो गणो मासि मासि नाना वसति सप्तकः ॥ २७
तेषां नामानि कर्माणि संयुक्तानामधीश्वरैः ॥ ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो
हरेः ॥ २८ ॥ श्रीसूत उ ॥ अनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनाम् ॥ निर्मितो लोक
तंत्रोयं लोकेषु परिवर्तते ॥ २९ ॥ एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः ॥ सर्व
वेदक्रियामूलमृषिभिर्बहुधोदितः ॥ ३० ॥

सौरः सूर्यसंबंधी सप्तानां गणः ॥ २७ ॥ तेषां सप्तानामधीश्वरैः सह तत्प्रवर्तिभिः तन्नामादि दि
कृष्णसूर्यैर्व्यूहं विभागं ॥ २८ ॥ तत्र तावत्व्यूहं निरूपयितुं प्रथमं श्रीभगवत्सूर्यस्य स्वरूपमाह
अनादिरविद्यया वेदरूपो लोकतंत्रः लोकयात्राप्रवर्तकः ॥ २९ ॥ अनन्तस्य क्रियाभेदोपाधिक
मेव नानात्वं न स्वत इत्याह एक एवेति ॥ सूर्य आत्मजगतस्तस्थुषश्चेति श्रुतेः ॥ जगदात्मा आदि
कृत्सृष्टिकर्ता हरिर्विष्णुः सर्वसर्वासां वैदीकक्रियाणां मूलं सर्व ॥ तेनोपाधिना बहुधोक्तः ॥ ३०

राम
५४

कालरूपधारिणो हरेः द्वादशादित्यरूपं भेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकामेषु प्रवृत्तयेमायाकृतं
नवधाभेदमाह ॥ काल इति कालः प्रातरादिः देशः समादिः क्रियाऽनुष्ठानं कर्ता ब्राह्मणादिः करणं
स्रुगादिः कार्यं यागादिः आगमः मंत्रादिः द्रव्यं व्रीह्यादिः फलं स्वर्गादिः ॥३१॥ तत्र कालरूपधारी भगवा
न्सूर्यरूपश्चरति चैत्रादिषु मासेषु लोकतंत्राय यात्रानिर्वाहाय ॥३२॥ तानेव गणानाह ॥ धातेति द्वादशभिः

कालो देशः क्रिया कर्ता करणं कार्यमागमः ॥ द्रव्यं फलमिति ब्रह्मन्नवधोक्तोजया हरेः
३१॥ मध्वादिषु द्वादशसु भगवान्कालरूपधृक् ॥ लोकतंत्राय चरति पृथग्द्वादशभिर्ग
णैः ॥३२॥ धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने ॥ पुलस्त्यस्तुंबुरुरिति मधुमासं न
यंत्यमी ॥३३॥१॥ अर्यमा पुलहोथौजाः प्रहेतिः पुंजिकस्थली ॥ नारदः कच्छनीरश्च
नयंत्येते स्म माधवम् ॥३४॥२॥ मित्रोऽत्रिः पौरुषेयोथ तक्षको मेनका हहा ॥ रथस्वन इ
ति ह्येते शुक्रमासं नयंत्यमी ॥३५॥३॥ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हूहूः ॥ शुक्रश्
चित्रस्वनश्चैव शुचिमासं नयंत्यमी ॥३६॥४॥

धाता सूर्यः ॥१॥ कृतस्थली अप्सराः ॥२॥ हेती राक्षसः ॥३॥ वासुकिर्नागः ॥४॥ रथकृद्यक्षः ॥५॥ पुल
स्त्यः ऋषिः तुंबुरुः गंधर्वः ॥७॥३३॥ अर्यमा सूर्यः ॥१॥ पुलह ऋषिः ॥२॥ अथौजाः यक्षः ॥३॥ प्रहेति
राक्षसः ॥४॥ नारदो गंधर्वः ॥५॥ कच्छनीरो नागः ॥६॥ पुंजिकस्थली अप्सराः ॥७॥ माधवं वैशाखं ॥३४॥
मित्रः सूर्यः ॥१॥ अत्रिः ऋषिः ॥२॥ पौरुषेयो राक्षसः ॥३॥ रथस्वनो यक्षः ॥४॥ तक्षको नागः ॥५॥ मेनका
अप्सराः ॥६॥ हाहा गंधर्वः ॥७॥३५॥ वरुणः सूर्यः ॥१॥ वसिष्ठः ऋषिः ॥२॥ रंभा अप्सराः ॥३॥ सहजन्यः यक्षः ॥४॥
हूहू गंधर्वः ॥५॥ शुक्रो नागः ॥६॥ चित्रस्वनो राक्षसः ॥७॥३६॥

श्री· भा·द्वा· टी· ३५

इंद्रः सूर्यः ॥१॥ विश्वावसुर्गंधर्वः ॥२॥ श्रोता यक्षः ॥३॥ एलापत्रो नागः ॥४॥ वर्यो राक्षसः ॥५॥ अंगिरा ऋषिः
६॥ प्रम्लोचाप्सराः ॥७॥ ३७॥ विवस्वान् सूर्यः ॥१॥ उग्रसेनो गंधर्वः ॥२॥ व्याघ्रो राक्षसः ॥३॥ आसारणो य
क्षः ॥४॥ भृगुः ऋषिः ॥५॥ अनुम्लोचाप्सराः ॥६॥ शंखपालो नागः ॥७॥ नभस्याख्यं भाद्रपदं ॥३८॥ धनंज
यो नागः ॥१॥ वातो राक्षसः ॥२॥ सुषेणो गंधर्वः ॥३॥ पूषा सूर्यः ॥४॥ सुरुचिर्यक्षः ॥५॥ घृताची अप्स
राः ॥६॥ गौतम ऋषिः ॥७॥ तपोमासं माघं ॥ मासक्रमातिलंघनं कौमोक्तपादिक्रमानुसारेण वेसवेत

इंद्रो विश्वावसुः श्रोता एलापत्रस्तथांगिराः ॥ प्रम्लोचा राक्षसो वर्यो नभोमासं नयंत्य
मी ॥ ३७ ॥ ५ ॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः ॥ अनुम्लोचा शंखपालो नभस्या
ख्यं नयंत्यमी ॥ ३८ ॥ ६ ॥ पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा ॥ घृताची गौतमश्चेति
तपोमासं नयंत्यमी ॥ ३९ ॥ ७ ॥ ऋतुर्वर्चा भरद्वाजः पर्जन्यः सेनजित्तथा ॥ विश्व ऐराव
तश्चैव तपस्याख्यं नयंत्यमी ॥ ४० ॥ ८ ॥ अथांशुः कश्यपस्तार्क्ष्य ऋतसेनस्तथोर्वशी
विद्युच्छत्रुर्महाशंखः सहोमासं नयंत्यमी ॥ ४१ ॥ ९ ॥ भगः स्फूर्जोरिष्टनेमिरूर्ण आयु
श्च पंचमः ॥ कार्कोटकः पूर्वचित्तिः पौषमासं नयंत्यमी ॥ ४२ ॥ १ ॥

मासक्रमेणैवोक्तिः ॥ क्वचित्क्रमव्यत्ययस्तु कल्पभेदेनेति ज्ञेयं ॥ ३९ ॥ ऋतुर्यक्षः ॥१॥ वर्चा राक्षसः ॥२॥
पर्जन्यः सूर्यः ॥३॥ सेनजिदप्सराः ॥४॥ विश्वो गंधर्वः ॥५॥ ऐरावतो नागः ॥६॥ भरद्वाज ऋषिः ॥७॥ तप
स्याख्यं फाल्गुनं ॥ ४० ॥ अंशुः सूर्यः अंशुरिति वा पाठः ॥१॥ कश्यप ऋषिः ॥२॥ तार्क्ष्यः यक्षः ॥३॥ ऋतसेनो
गंधर्वः ॥४॥ उर्वशी अप्सराः ॥५॥ विद्युच्छत्रुः राक्षसः ॥६॥ महाशंखः नागः ॥७॥ सहोमासं मार्गशीर्षं ॥ ४१
भगः सूर्यः ॥१॥ स्फूर्जो राक्षसः ॥२॥ अरिष्टनेमिर्गंधर्वः ॥३॥ ऊर्णो यक्षः ॥४॥ आयुः ऋषिः ॥५॥ कार्कोट
को नागः ॥६॥ पूर्वचित्तिः अप्सराः ॥७॥ पौषमासः ॥ ४२ ॥

राम ३५

त्वष्टा सूर्यः ॥ १ ॥ दधीचीकतनयो जमदग्निर्ऋषिः ॥ २ ॥ कंबलाश्वो नागः ॥ ३ ॥ तिलोत्तमाप्सराः ॥ ४ ॥ ब्रह्मापे
तो राक्षसः ॥ ५ ॥ शतजित्यक्षः ॥ ६ ॥ धृतराष्ट्रो गंधर्वः ॥ ७ ॥ इषंभरास्त्वाश्विनपालकाः ॥ ४३ ॥ विष्णुरादित्यः १
अश्वतरो नागः ॥ २ ॥ रंभाप्सराः ॥ ३ ॥ सूर्यवर्चा गंधर्वः ॥ ४ ॥ सत्यजिद्यक्षः ॥ ५ ॥ मखापेतो राक्षसः ॥ ६ ॥
विश्वामित्र ऋषिः ॥ ७ ॥ ऊर्जे मासं कार्त्तिकं ॥ ४४ ॥ एते चादित्यादयः कौर्मे विभक्ताः ॥ धातार्यमा च
मित्रश्च वरुणश्चेंद्र एव च ॥ विवस्वानथ पूषा च पर्जन्यश्चांशुरेव च ॥ भगस्त्वष्टाथ विष्णुश्च आदित्या द्वाद
श स्मृताः ॥ १ ॥ पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोथांगिरा भृगुः ॥ गौतमोथ भरद्वाजः कश्यपः क्रतुरेव च ॥ ज
मदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः ॥ २ ॥ रथकृच्चारिष्टनेमिर्ग्रामणीश्च रथस्वनः ॥ रथचित्रस्व

त्वष्टा दधीकतनयः कंबलाश्वस्तिलोत्तमा ॥ ब्रह्मापेतोथ शतजिद्धृतराष्ट्र इषंभराः ॥ ४३ ॥
विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजित् ॥ विश्वामित्रो मखापेत ऊर्जे मासं नयंत्यमी ॥ ४४ ॥
एता भगवतो विष्णोरादित्यस्य विभूतयः ॥ स्मरतां संध्ययोर्नॄणां हरंत्यंहो दिने दिने ॥ ४५ ॥

नः श्रोता सुरुचः सेनजिन्नथा ॥ ताक्ष्योश्चारिष्टनेमिश्च ऋतजित्क्रतजिन्नथा ॥ ३ ॥ इति यक्षाः ॥ अथ हेतिः
प्रहेतिश्च पौरुषेयो वधस्तथा ॥ वर्यो व्याघ्रस्तथापश्च वायुर्विद्युद्दिवाकरः ॥ ब्रह्मापेतश्च विप्रेंद्र यज्ञापेतश्च
राक्षसाः ॥ ४ ॥ वासुकिः कच्छनीरश्च तक्षकः सर्पपुंगवः ॥ एलापत्रः शंखपालस्तथैरावतसंज्ञितः ॥ धनं
जयो महापद्मस्तथा कर्कोटको द्विजाः ॥ कंबलोश्वतरश्चैव वहंत्येनं यथाक्रमं ॥ ५ ॥ तुंबुरुर्नारदो हाहा
हूहूर्विश्वावसुस्तथा ॥ उग्रसेनो वसुरुचिर्विश्वावसुरथापरः ॥ चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्त
माः ॥ सूर्यवर्चा द्वादशेति गंधर्वा गायतां वराः ॥ ६ ॥ कृतस्थल्यप्सरोवर्या तथान्या पुंजिकस्थली ॥
मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमा ॥ रंभा चेति द्विजश्रेष्ठाः तथैवाप्सरसः स्मृता इति ॥ ७ ॥ ४५ ॥

श्री·
भा·द्वा·
टी·
९९

एतेषां षट्पदवर्गः कल्पे मासि मासि निरूपयति द्वादशस्वपीति त्रिभिः ॥ असौ देवः सूर्यः षड्भिर्गंधर्वादिभिः स्वगं
धर्वादिभिः स्वगणेन सह समंतात्सञ्चरन् सुभोमतिं तनुते गायत्र्यर्थः एतेन सूचितः ॥४६॥ तल्लिंगैः सूर्यप्रका
शकैः ॥४७॥ उन्नह्यंति दृढं बध्नंति ग्रामण्यो यक्षाः नैरृता राक्षसाः ॥४८॥ किंच वालखिल्या इति ॥ एतत्प्र
प्रतिमासं तत्पर्वं विभुं सूर्यं ॥४९॥ व्यूह्य विभज्य ॥५०॥ इति श्रीभावार्थदीपिकायां द्वादशस्कंधे एकाद
शोऽध्यायः ॥११॥ द्वादशेन पुराणोक्तसर्वार्थानुक्रमः कृतः ॥ प्रथमं स्कंधमारभ्य धर्माद्याश्चेनस

द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै ॥ चरन्समंतात्तनुते परत्रेह च सन्मतिं ॥४६॥ साम
र्ग्यजुर्भिस्तल्लिंगैरृषयः संस्तुवंत्यमुं ॥ गंधर्वास्तं प्रगायंति नृत्यंत्यप्सरसोऽग्रतः ॥४७॥ उ
न्नह्यंति रथं नागा ग्रामण्यो रथयोजकाः ॥ चोदयंति रथं पृष्ठे नैरृता बलशालिनः ॥
४८॥ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोऽमलाः ॥ पुरतोऽभिमुखं यांति स्तुवंति स्तु
तिभिर्विभुं ॥ ४९ ॥ एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः ॥ कल्पे कल्पे स्वमात्मानं व्यू
ह्य लोकानवत्यजः ॥५०॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे सूर्यव्यूहवर्णनं नामैकाद
शोऽध्यायः ॥११॥ श्रीहरिः ॥ नमो धर्माय महते नमः कृष्णाय वेधसे ॥ ब्राह्मणेभ्यो नम
स्कृत्य धर्मान्वक्ष्ये सनातनान् ॥ १ ॥

मात्मनः ॥१॥ तदेवास्मिन् श्रीभागवते महापुराणे तत्कथान्वयीनि संक्षेपतो वर्णयिष्यन् धर्मादीन् प्रणमति
सूतः नम इति महते हरिभक्तिलक्षणाय ब्राह्मणेभ्यः ब्राह्मणान् सनातनान् धर्मान् इत्युपलक्षणं पु राम
राणोक्तार्थानाम् ॥१॥ ॥ श्रीरामाय नमः ॥ ॥ ९९

पुरुषस्येवोचितं श्रवणयोग्यं ॥ २ ॥ एतत्सर्वं चयति श्रुत्वेति भगवान् ॥ वैष्णवयोर्दिष्वदुत्तः साक्षात्संकीर
र्तितः इति द्वितीयकांडार्थः ॥ ३ ॥ ब्रह्मकांडार्थमाह ॥ अत्र ब्रह्मेति गुह्यं निर्गुणं प्रभवाप्ययं प्रभवति अस्मा
दिति प्रभवः ॥ अप्येति ॥ अस्मि[illegible]ति ॥ अप्ययं ॥ तत्त्वं तत्त्वमसि नाश्रयशास्त्रोदर्शितः ॥ विज्ञानं संयुतं अप
रोक्षपरोक्षं ज्ञानं तदुपाख्यानं तत[illegible]तत्प्रुपाख्यायते प्रकाशते येन तत् ॥ ज्ञानसाधनमित्यर्थः ॥ ४ ॥
कर्मकांडार्थमाह ॥ भक्तियोग[illegible]साध्यसाधनरूपः तदाश्रयं भक्तियोगेन निष्पादितं एवं सामान्य

एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतम् ॥ भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितं ॥ २ ॥ अ
त्रसंकीर्तितः साक्षात्सर्वपापहरो हरिः ॥ नारायणो हृषीकेशो भगवान्सात्वतां पतिः ॥ ३
अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययम् ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं ॥ ४ ॥
भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयम् ॥ पारीक्षितमुपाख्यानं नारदाख्यानमेव च
५ ॥ प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः ॥ शुकस्य च ब्रह्मर्षभस्य संवादश्च परीक्षितः ॥ ६ ॥
योगधारणयोत्क्रांतिः संवादो नारदाजयोः ॥ अवतारानुगीतं च सर्गः प्राधानिकोऽग्रतः ॥ ७ ॥
विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः ॥ पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ॥ ८ ॥
ततः प्राकृतिकाः सर्गाः सप्त वैकृतिकाश्च ये ॥ ततो ब्रह्मांडसंभूतिर्वैराजः पुरुषो यतः ॥ ९ ॥

तो निरूपयदानीं द्वादशस्कंधप्रकरणार्थं मनुक्रामति पारीक्षितमुपाख्यानं परीक्षिज्जन्मादि नारदाख्या
यनारदाख्यानं च ॥ ५ ॥ ब्रह्मर्षभं ब्राह्मणोत्तमस्य इति प्रथमस्कंधार्थः ॥ ६ ॥ उत्क्रांतिरर्चिरादिगतिः प्राधानि
कः प्रधानकार्यविराड्रूपः अग्रतः आदितः महदादिक्रमेणेत्यर्थः ॥ इति द्वितीयार्थः ॥ ७ ॥ महापुरुष
संस्थितिः प्रलयेवस्थीमवस्थानं ॥ ८ ॥ प्राकृतिकः प्रकृतिभवो गुणक्षोभरूपः वैकृतिका महदादयः
वराहहैहिकाश्च ये तयोर्लिंगांच सर्गः ॥ ९ ॥ श्रीकृष्णाय नमः ॥

श्री॰ भा॰ टी॰ टी॰ ३३ गतिः स्वरूपं उद्धरणं उद्धरणं ॥१०॥ अर्धांशेनार्धनारीश्वरस्य ॥११॥ संतानो धर्मपत्नीनामिति नवब्रह्मस
मुत्पत्तिरित्यस्यात्रानंतरं द्रष्टव्यं ॥१२॥ चतुर्थस्कंधमाह ॥ नवब्रह्मणां मरीच्यादीनां ऋषीणां समुत्प
त्तिः संतानः ॥१४॥ पंचमस्कंधार्थमाह ॥ ततः प्रैयव्रतं प्रियव्रतस्य चरितं ॥१५॥ द्वीपाद्यवर्णनं प्रसक्तं

कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः ॥ भुव उद्धरणेंभोधेर्हिरण्याक्षवधो यथा
१०॥ ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च ॥ अर्धनारीश्वरस्याथ यतः स्वायंभुवो मनुः
११॥ शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा ॥ संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः
१२॥ अवतारो भगवतः कपिलस्य महात्मनः ॥ देवहूत्याश्च संवादः कपिलेन च धीमता
१३॥ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनम् ॥ ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हि
षः ॥१४॥ नारदस्य च संवादस्ततः प्रैयव्रतं द्विज ॥ नाभेस्ततोऽनुचरितमृषभस्य भरतस्य
च ॥१५॥ ततो द्वीपसमुद्रादिवर्षनद्युपवर्णनम् ॥ ज्योतिश्चक्रस्य संस्थानं पातालनरक
स्थितिः ॥१६॥ दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च संततिः ॥ यतो देवासुरनरास्तिर्यङ्नग
खगादयः ॥१७॥ त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्च दितेर्द्विजाः ॥ दैत्येश्वरस्य चरितं प्रह्लादस्य
महात्मनः ॥१८॥ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणम् ॥ मन्वंतरावताराश्च विष्णोर्हयश
िरादयः ॥१९॥

संक्षेपतः ॥ ततो द्वीपादीनां गिरीणां नदीनां चोपवर्णनं पातालनरकादीनां च स्थितिः अनेनैव नरकनि
वर्तकं अजामिलोपाख्यानं गृहीतं ततः प्राचीनं ॥१६॥ षष्ठार्थमाह ॥ दक्षजन्मेति सप्तमार्थमाह
पुत्रयोश्चेति ॥१८॥ अष्टमार्थमाह ॥ मन्वंतरानुचरितमिति क्वचित्कस्यचिद्व्युत्क्रमोक्तिश्च भ राम ३३
क्तिरसानुकूलत्वेनेति द्रष्टव्यं ॥१९॥

नवमार्थमाद्याजवंशोति ॥१९॥ तत्कृतस्य चभीष्मस्य ॥१८॥ दशमस्कंधार्थमारभ्य श्रीकृष्णस्य कर्माणीति पूतना याग्रह

कौर्मं मात्स्यं नारसिंहं वामनं च जगत्पते ॥ क्षीरोदमथनं तद्वदमृतार्थे दिवौकसां ॥२०॥ इलोपाख्यानमत्रोक्तं
तारोपाख्यानमेव च ॥ सूर्यवंशानुकथनं देशशशादाद्या नृगादयः ॥२१॥ देवाह्वरमहाशुचिंगजवंशानुकी
र्तनम् ॥ इक्ष्वाकुजन्मतद्वंशाः सयुम्नस्य महात्मनः ॥२२॥ सोमवंशादिभूतस्य ऐलस्य चरितं तथा ॥२२॥ सौ
कन्यं चाथ शर्यातेः ककुत्स्थस्य च धीमतः ॥२३॥ खट्वांगस्य च मांधातुः सौभरेः सगरस्य च ॥२३॥ रामस्य को
सलेंद्रस्य चरितं किल्विषापहं ॥ निमेरंगपरित्यागो जनकानां च संभवः ॥२४॥ रामस्य भार्गवेंद्रस्य निःक्षत्रीक
रणं भुवः ॥ ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च ॥२५॥ दौष्यंते भरतस्यापि शांतनोस्तत्सुतस्य च ॥ यया
ते ज्येष्ठपुत्रस्य यदोर्वंशानुकीर्तनं ॥२६॥ यत्रावतीर्णो भगवान्कृष्णाख्यो जगदीश्वरः ॥ वसुदेवगृहे ज
न्म ततो वृद्धिश्च गोकुले ॥२७॥ तस्य कर्माण्यपाराणि कीर्तितानि महाद्विषः ॥ पूतनासुपयःपानं शकटो
च्चाटनं शिशोः ॥२८॥ तृणावर्तस्य निःपेषः तथैव बकवत्सयोः ॥ धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः
गोपानां च परित्राणं दावाग्नेः परिसर्पतः ॥ दमनं कालियस्याहेर्महाहेर्नंदमोक्षणं ॥३०॥ व्रतचर्या तु क
न्यानां यत्र तुष्टोच्युतो व्रतैः ॥ प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनं ॥३१॥ गोवर्द्धनोद्धरणं च शक्रस्य
सुरभेरथ ॥ यज्ञाभिषेकं कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ॥३२॥ श्रीरामायनमः ॥ ॥

सहितस्यान्यत्पयसः पाते ॥२८॥ सहभ्रातस्यैस्यवस्य ॥२९॥ ३०॥ ३१॥ यज्ञाभिषेकं यज्ञपूजायाभिषेकश्च तयोर्द्वंद्वैकं ॥ ३२ ॥

द्विषतः शत्रून् प्रमथ्य ॥ ३७ ॥ ये च बहवो वशादयः तेषां ॥ ३९ ॥ माहात्म्यं प्रभावः ॥ ४० ॥ सर्वपरित्यागः सानुषक्तस्यां तथापि ॥
४२ ॥ द्वादशस्यार्थमाह ॥ युगेति युगलक्षणं तदनु नृणां कलौ स्थितेरित्यर्थः ॥ त्रिविधा प्रकृतिका नैमित्तिका नित्या चेति ॥ ४३ ॥

व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः ॥ गजमुष्टिकचाणूरकंसादीनां च यो वधः ॥ ३३ ॥ मृतस्यान
यनं सूनोः पुनः सांदीपने गुरोः ॥ ३४ ॥ मथुरायां निवसता यदुचक्रस्य यत्प्रियं ॥ कृतमुद्धवरामाभ्यां
युतेन हरिणा द्विजाः ॥ ३५ ॥ जरासंधसमानीतसैन्यस्य बहुशो वधः ॥ घातनं यवनेंद्रस्य कुशस्थल्या निवे
शनं ॥ ३६ ॥ आदानं पारिजातस्य सुधर्मायाः सुरालयात् ॥ रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः ॥ ३७
हरस्य जृंभणं युद्धे बाणस्य भुजकृंतनं ॥ प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ॥ ३८ ॥ चैद्यपौंड्रक
शाल्वानां दंतवक्त्रस्य दुर्मतेः ॥ शंबरो द्विविदः पीठो मुरः पंचजनादयः ॥ ३९ ॥ माहात्म्यं च वधस्तेषां
वाराणस्याश्च दाहनं ॥ भारावतरणं भूमेर्निमित्तीकृत्य पांडवान् ॥ ४० ॥ विप्रशापापदेशेन संहारः स्वकु
लस्य च ॥ उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ॥ ४१ ॥ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनिर्णयः
ततो मर्त्यपरित्याग आत्मयोगानुभावतः ॥ ४२ ॥ युगलक्षणवृत्तिश्च कलौ नृणामुपप्लवः ॥ चतुर्विधश्च
प्रलय उत्पत्तिस्त्रिविधा तथा ॥ ४३ ॥ देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः ॥ शाखाप्रणयनमृषेर्मार्कं
डेयस्य सत्कथाः ॥ ४४ ॥ महापुरुषविन्यासः सूर्यस्य जगदात्मनः ॥ इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोऽहमिहा
स्मि वः ॥ लीलावतारकर्माणि कीर्तितानीह सर्वतः ॥ ४५ ॥ ॥ ॥ राम ॥ ॥

ऋषेर्मार्कंडेयस्य सूर्यस्य च विन्यासः इत्यर्थः ॥ ४४ ॥ इति चोक्तमिति चकारादन्यदपि वः युष्माभिरिह यत्पृष्टोऽस्मि तत्तदुक्तमि
ति ॥ किमेवं नानार्थकथनेन तत्राह लीलेति सर्वतः तदर्थकीर्तनद्वारेणेत्यर्थः ॥ ४५ ॥ ॥

गत्कीर्तनेनापि किमित्यपेक्षायां तत्फलमाह द्वाभ्यां ॥ पतितः कूपादिषु स्खलितः सोपानादिषु आर्तः दुःखितः क्षुत्वा व
तं रुत्वा विवशोपि ॥४७॥ संकीर्त्यमानः यद्यश्रुतोनुभावो यस्य सः पुंसां चित्तं प्रविश्य पुनः शेषं दुःखं विधुनातीति द्वौति
सतामनुभवं प्रमाणयति ॥ अर्को मिहिरः ग्रहादीनां तमनिवर्तयतीत्यपरितोषदृष्टान्तरमाह ॥ अतिवातोभ्रमिवेति
४८ ॥ हरिसंकीर्तनमेव महाफलं तद्व्यतिरिक्तं सर्वं मिथ्यालापमिति प्रपंचयति ॥ मृषा गिर इति चतुर्भिः मृषा गिरः मि

पतितः स्खलितो वार्तः क्षुत्वा विवशो गृणन् ॥ हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥४७॥ संकीर्त्यमानो भग
वाननन्तः श्रुतानुभावो व्यसनं हि पुंसां ॥ प्रविश्य चित्तं विधुनोति शेषं यथा तमोर्कोभ्रमिवातिवातः ॥४८॥ मृ
षा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ॥ तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणो
दयं ॥४९॥ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवं ॥ तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लो
कयशोनुगीयते ॥५०॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्ध्वांक्षतीर्थं न तु हंससे
वितं यत्राच्युतस्तत्र हि साधवोमलाः ॥५१॥

ध्यावाचः असतीः असत्याः ॥ असतां कथा यासु ताः ॥ यत् यासु उत्तमश्लोकस्य यशो नगीयते इति यत् ॥ तदेव सत्यं तदेव हि मंग
लं हरतीति हर्षं ॥ श्रीभगवद्गुणानामभ्युदयो यस्मात्तत्तत् ॥४९॥ नवं नवं यथा भवति तथा रुचिरं रुचिप्रदं महानुत्सवो यस्मा
त् ॥५०॥ चित्राणि पदानि यस्मिन् ॥ तदपि जगत् पवित्रयतीति ॥ तथा तद्धरेः यशो नप्रगृणीत न वर्णयेत् ॥ तद्वचः ध्वांक्षतीर्थं का
कतुल्यनराणां भक्तिस्थानं न तु हंसैः ज्ञानिभिः सेवितं चित्रपदं रमणीयापादं तत्र हेतुः यत्रेति ॥५१॥

श्री॰
भा॰ टी॰
११

सवाग्विसर्गः॥ स एव वाचां प्रयोगः जनताघसंप्लवः जनसमूहस्य पापनाशकः यद्यस्मात्॥ नान्येवान्यैः कीर्त्यमाना
नि शृण्वंति श्रोतरि सति गायंति नो चेत् स्वयमेव गृणंति॥ ५२॥ इदानीं ज्ञानकर्मादरादपि श्रीभगवत्कीर्तनादि श्रे
यस्करं कर्तव्यमिति आह नैष्कर्म्यं तत्प्रकाशकं यत् ज्ञानं यतो निरंजनमुपाधिनिवर्तकं तदपि अच्युतभक्तिवर्जितं
चेत् न शोभते न परोक्षापर्यंतं भवतीत्यर्थः॥ ईश्वरेण चेदर्पितं तर्हि यदकर्म॥ सर्वोत्तममपि कर्म तदपि पुनः कुतः
शोभते यतः॥ शश्वत् साधनकाले फलकाले च अभद्रं दुःखात्मकं॥ ५३॥ किं च वर्णाश्रमाचारादिषु यः परो महान्

स वाग्विसर्गो जनताघसंप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि॥ नामान्यनंतस्य यशोंकितानि यच्छृ
ण्वंति गायंति गृणंति साधवः॥ ५२॥ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं॥ कुतः
पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यनुत्तमं॥ ५३॥ यतः श्रियामेव परिश्रमः परो वर्णाश्र
माचारतपःश्रुतादिषु॥ अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः॥ ५४॥ अ
विस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि शमं तनोति च॥ सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं
च विज्ञानविरागयुक्तं॥ ५५॥ यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतं॥ नारायणं दे

वमदेवमीशमजस्रभा
वा भजताविवेशुप॥ ५८

परिश्रमः स यशो युक्तायां श्रियामेव कीर्तिः संपत्तिश्च केवलं न परमपुरुषार्थ इत्यर्थः॥ गुणानुवादादिभिस्तु श्री
धरपादपद्मयोः अविस्मृतिर्भवति॥ ५४॥ ततः किमत आह॥ अविस्मृतिरिति॥ क्षिणोति नाशयति॥ ५५॥ अथेदानीं
श्रोतन्नात्मानं चाभिनंदन्नाह यूयमिति॥ द्वाभ्यां हे द्विजाग्र्याः शौनकादयः॥ यद्यस्मादात्मन्यंतःकरणे श्रीनारा
यणमाविवेशुप॥ आवेशितवंतः भावनायोगेन॥ अतो भूरिभागा बहुपुण्यतमाः कथंभूतं अखिलात्मभूतं सर्वा
तर्यामिणं अतएव देवं सर्वोपास्यं अदेवं न देवो यस्मात्तत् कुत ईशं॥ यद्वा यस्मात् यूयं भूरिभागाः तपआदियोग

संपन्नाः ततो नारायणं भजतेति
विधिः॥ ५९

राम॰
११

मेमयाकृतं ॥ ५७ ॥ एतत्कीर्तनादिफलं प्रपंचयितुमाह ॥ एतद्वइतितृभिः ॥ ५८ ॥ यामक्षणं चेत्यर्थः आत्मानमेव साक्षादात्मना
ति ॥ नतुस्नानादिवत्देहमात्रं ॥ ५९ ॥ ऋगादिति यथीत्य मधुकुल्यादि यद्वद्विंदते तत्फलमेतां पठित्वाप्नुविंदति ॥ ६३ ॥ किं

अहं च संस्मारित आत्मतत्त्वं श्रुतं पुरा मे परमर्षिवक्त्रात् ॥ प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां
च शृण्वतां ॥ ५७ ॥ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः ॥ माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनं ॥ ५८
य एवं श्रावयेन्नित्यं यामक्षणमनन्यधीः ॥ श्रद्धावान्योनुशृणुयात्पुनात्यात्मानमेव सः ॥ ५९ ॥ द्वादश्यामेका
दश्यां वा शृण्वन्नायुष्यवान्भवेत् ॥ पठत्यनश्नन्प्रयतः ततो भवति पातकी ॥ ६० ॥ पुष्करे मथुरायां च द्वारवत्यां य
तात्मवान् ॥ उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ॥ ६१ ॥ देवता मुनयः सिद्धाः पितरो मनवो नृपाः ॥ य
च्छंति कामान्गृणतः शृण्वतो यस्य कीर्तनात् ॥ ६२ ॥ ऋचो यजूंषि सामानि द्विजोधीत्यानुविंदते ॥ मधुकुल्या घृ
तकुल्याः पयः कुल्याश्च तत्फलं ॥ ६३ ॥ पुराणसंहितामेतामधीत्य प्रयतो द्विजः ॥ प्रोक्तं भगवता यत्तु तत्पदं पर
मं व्रजेत् ॥ ६४ ॥ विप्रोधीत्याप्नुयात्प्रज्ञां राजन्योदधिमेखलां ॥ वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात् ॥
कलिमलसंहतिकालनोखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णं ॥ इह तु पुनर्भगवानशेषमूर्तिः परिपठितो
नुपदं कथाप्रसंगैः ॥ ६६ ॥

वप्रोक्तमिति ॥ ६४ ॥ राजन्य उदधिमेखलां पृथ्वीं संधिरार्षः ॥ ६५ ॥ अस्य पुराणस्य श्रीमद्भागवताख्यस्यैवं प्रभावातिरेके का
रणमाह ॥ कलिमलानां संहतिं समूहं कालयति विनाशयतीति ॥ तथा इतरत्र प्रशास्त्रांतरे ॥ ६६ ॥ राम ॥ ॥

श्री॰ भा॰ द्वा॰ टी॰ ५

ग्रन्थस्य प्रतिपादितं श्रीभगवंतं नमस्करोति ॥ तमिति द्वाभ्यां ॥ जगदुदयस्थितिसंयमात्मानो रजआदयः शक्तयो यस्य
तं द्युपतिभिर्देवैरपि दुरवसितः अज्ञातः स्तवः स्तोत्रं यस्य तं ॥६७॥ उपचिताभिरुद्रिक्ताभिर्नवशक्तिभिः प्रकृतिपुरुष-
महदहंकारतन्मात्ररूपाभिः स्वस्मिन्नात्मन्येवोपरचितं स्थिरं जंगमं चालयो यस्य तस्मै श्रीभगवते ॥६८॥ श्रीगुरुं नमस्क-
रोति स्वसुखेनैव निभृतं परिपूर्णं चेतो यस्य सः तेनैव विरस्तः अन्यस्मिन्भावो यस्य तथाभूतोपि अजितस्य रुचिराभिर्लीला

तमहमजमनंतमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिं ॥ द्युपतिभिरजशक्रशंकराद्यैर्दुरवसित
स्तवमच्युतं नतोस्मि ॥६७॥ उपचितनवशक्तिभिः स्वआत्मन्युपरचितस्थिरजंगमालयाय ॥ भगवत
उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ॥६८॥ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोप्यजित
रुचिरलीलाकृष्टसारस्तदीयं ॥ व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं न
तोस्मि ॥६९॥ इति श्रीभागवते द्वादशस्कंधे प्रतिसंक्रमलक्षणे माहात्म्यवर्णनं नाम द्वादशोध्यायः
यं ब्रह्मावरुणेंद्ररुद्रमरुतस्तुन्वंति दिव्यैः स्तवैः वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः ॥ ध्याना
वस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥१॥ पृष्टे भ्रा
म्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पांतु वः ॥ यत्सं
स्कारकलानुवर्तनवशाद्वेलानिभेनांभसां यातायातमतंद्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥२

भिराकृष्टः सारः स्वसुखं गतं स्थैर्यं यस्य सः ॥ तत्त्वदीपं परमार्थप्रकाशकं श्रीभागवतं यो व्यतनुत तं नतोस्मीति ॥६९
द्वादशे द्वादशोध्यायः ॥१२॥ सर्वपुराणसंख्यादीनुपवर्ण्य विशिष्य तत्प्रतिपाद्यं देवं प्रणमति स्तवैर्वेदैश्च स्तुन्वंति ॥
स्तुवंति उपनिषदैः इति रूपं छांदसं ध्यानेनावस्थितं निश्चलं तद्गतं यन्मनः तेन यस्यांतं न विदुः सुरासुरगणाः ॥ राम॰ ५
१

टीका
श्लोक २ पत्रे
५०

त्तीरोदमथनादौ दुर्द्धे यत्नमेव यद् ग्राविर्व्वे कूर्मावतारमनुस्मारयन्नाशिषं प्रार्थयते ॥ पृष्ठे भ्रामित् ॥ अमंदो गरिष्ठो मंदरगिरि
तस्य ग्रावाणः तेषामग्राणि तैः कंडूयनात् ॥ तेन मत्वे न निद्रालोर्निद्राशीलस्य ये ये श्वासानिला ताः संस्काराः तेषां कलाश्च
लेशाः तदनुवर्तनवशात् ॥ जलनिधेरंभसां यातायातं न विश्राम्यति ननु समुद्रस्तोभादेव तत्तु न संस्कारवशात् ॥ तत्राह वेला
ला स्तोभः वेलातटे ऊर्मीणां स्तोभः ॥ तस्य निभेन मिषेणेति पूर्वस्य टीका ॥ २ ॥ पुराणसंख्यां तासां संभूतिं समाहारं च ॥ अ

स्य तः ॥ पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने ॥ दानं दानस्य माहात्म्यं पाठादेश्च निबोधत ॥ ३ ॥ ब्राह्मं दश स
सहस्राणि पाद्मं पंचोनषष्टि च ॥ वैष्णवं त्रयोविंशं च चतुर्विंशति शैवकं ॥ ४ ॥ दशाष्टौ श्रीभागवतं नारदं पंच
विंशतिः ॥ मार्कंडं नव वाह्नं च दश पंच चतुःशतं ॥ ५ ॥ चतुर्दश भविष्यं स्यात्तथा पंच शतानि च ॥ दशाष्टौ ब्र
ह्मवैवर्तं लिंगमेकादशैव तु ॥ ६ ॥ चतुर्विंशति वाराहमेकाशीतिसहस्रकं ॥ स्कांदं शतं तथा चैकं वामनं द
श कीर्तितं ॥ ७ ॥ कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ॥ एकोनविंशत्सौपर्णं ब्रह्मांडं द्वादशैव तु ॥ ८

अस्य श्रीमद्भागवतस्य वाच्यं विषयं प्रयोजनं वा दानं च पाठादेश्च निबोधत ॥ ३ ॥ त्रयोविंशत् त्रयोविंशतिः ॥ चतुर्विंशतिस
हस्राणि शैवकं शिवपुराणं ॥ ४ ॥ वाह्नं तु अग्निपुराणं दशपंचसहस्राणि चत्वारि शतानि ॥ ५ ॥ ८ ॥ स्कांदं शताधिकाशी
तिसहस्रं ॥ ७ ॥ सौपर्णं गारुडपुराणं एकोनविंशत् एकोनविंशति ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥

श्री॰ भा॰ मा॰ टी॰ ८१

महाभारतं तदितिहासः विस्तधर्मो नवं चेतिहासएव ॥ श्रीरामायणं वज्रविशोकं काव्यं ॥ अतः पुराणानां संदोहः
समस्तश्चतुर्लक्षसंख्याक एव ॥ इदानीमस्य वाच्यप्रयोजनादीनुद्दिशो यदि महाहतमेत्यादिना ॥ ॥ हरिलीलाकथा

एवं पुराणसंदोहः चतुर्लक्षउदाहृतः ॥ तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ॥ ९ ॥ इदं भगवता पू-
र्वं ब्रह्मणे नाभिपंकजे ॥ स्थिताय भवभीताय कारुण्यात्संप्रकाशितं ॥ १० ॥ आदिमध्यावसानेषु वैरा-
ग्याख्यानसंयुतं ॥ हरिलीलाकथाव्रातामृतानंदितसत्सुरं ॥ ११ ॥ सर्ववेदांतसारं यद्ब्रह्मात्मैकत्वल-
क्षणं ॥ वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनं ॥ १२ ॥ प्रोष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितं ॥ ददा-
ति यो भागवतं स याति परमां गतिं ॥ १३ ॥ राजंते तावदन्यानि पुराणानि सतां गणे ॥ यावद्भागवतं पु-
राणं श्रूयते मृतसागरं ॥ १४ ॥ सर्ववेदांतसारं हि श्रीभागवतमिष्यते ॥ तद्रसामृततृप्तस्य नान्यत्र स्याद्र-
तिः क्वचित् ॥ १५ ॥

तां ज्ञातः समस्तः सएवामृतं तेनानंदिताः संतः सुराः स्वीयेन तत ॥ ११ ॥ तन्निष्ठं तद्विषयं ॥ १२ ॥ प्रोष्ठपद्यां भाद्रपद्यां हे-
मसिंहसमन्वितं स्वर्णसिंहासनारूढं ॥ १३ ॥ तद्रसएवामृतं तेन तृप्तस्य निर्वृतस्य ॥ १५ ॥ ॥ ॥

राम॰ ८१

परमहंस्यं परमहंसैः प्राप्यं सर्वकर्मोपरमः भक्त्या तच्छ्रवणादिपरो विमुच्यते ॥१८॥ श्रीभागवतसंप्रदायप्रव-
र्तकरूपेण श्रीमद्भगवद्ध्यानलक्षणं मंगलमाचरति ॥ कस्मै ब्रह्मणे ॥ अतुलः असमः अयं श्रीभागवतरूपः पु

निम्नगानां यथा गंगा देवानामच्युतो यथा ॥ वैष्णवानां यथा शंभुः पुराणानामिदं तथा ॥१६॥ क्षेत्रा-
णां चैव सर्वेषां यथा काश्यप्यनुत्तमा ॥ तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः ॥१७॥ श्रीमद्भा-
गवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते ॥ यत्र ज्ञानवि-
रागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥१८॥ कस्मै ये-
न विभासितोयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ॥ योगीन्द्राय
तदात्मनाथ भगवद्राताय कारुण्यतः तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥१९॥ ॥

रा कल्पादौ तद्रूपेण ब्रह्मरूपेण तद्रूपिणा नारदरूपिणा ॥ योगीन्द्राय शुकाय साक्षात् तदात्मना श्रीमच्छुकरूपेण तत्परं सत्यं
श्रीनारायणाख्यं सत्त्वं धीमहीति गायत्र्यैव यथोपक्रममुपसंहरन् ॥ गायत्र्याख्या ब्रह्मविद्येयमिति दर्शयति ॥१९॥

भा॰
श्री भा॰
दी॰ टी॰
४२

तमेवदेवतारूपेणगुरुरूपेणचप्रणमति ॥ नमइतिद्वाभ्यां आबद्धस्यैव्याख्यातवान् ॥ २० ॥ भावार्थदीपिकामे
तांभगवद्भक्तवत्सलां ॥ श्रीपरानंदपादाब्जभृंगःश्रीश्रीधरोकरोत् ॥ स्वबालचापलालापैःस्वलीलापरिन
र्तितैः ॥ प्रीयतांपरमानंदनृहरिःसद्गुरुःस्वयं ॥ श्रीपरानंदसंप्रीत्यैगुह्यंभागवतंमया ॥ विवृतंतन्मतेनेदंनन्नम

गंनमस्तस्मैभगवतेवासुदेवायसाक्षिणे ॥ यइदंकृपयाकस्मैव्याचचक्षेमुमुक्षवे ॥ २० ॥ योगी
न्द्रायनमस्तस्मैशुकायब्रह्मरूपिणे ॥ संसारसर्पदष्टंयोविष्णुरातममूमुचत् ॥ २१ ॥ भवेभवेय
थाभक्तिःपादयोस्तवजायते ॥ तथाकुरुष्वयोगेशनाथस्त्वंमेयतःप्रभोः ॥ २२ ॥ नामसंकी
र्तनंयस्यसर्वपापप्रणाशनं ॥ प्रणामोदुःखशमनःतंनमामिहरिंपरं ॥ २३ ॥ इतिश्री भा
गवतेमहापुराणेअष्टादशसाहस्र्यांसंहितायांद्वादशस्कंधेस्त्रोकेत्रयोदशोध्या
यः ॥ १३ ॥ समाप्तमिदंश्रीभागवतनामपुराणंशुभंभूयात् ॥ लेखकपाठकयोः ॥ ॥ ॥

शिवंशिवंशि ॥ ॥ ॥ ॥ ॥ ॥

ष्मतिवैभवान् ॥ इतिश्रीभावार्थदीपिकायांद्वादशस्कंधेत्रयोदशोध्यायः ॥ १३ ॥ समाप्तश्चायंभागवत
नामप्रदीपिका ॥ शुभं ॥ श्रीरूपसपादपद्मेभ्योमकरंदस्पृहार्थिना ॥ सत्वंम ऊंदभृंगेनलिखनेनोद्धृतं
परं ॥ स्वारशीरोषान्मतिविभ्रमाद्वायदर्थहीनंलिखितंमयाहि ॥ तत्सर्वमार्यैःपरिशोधनीयंप्रायेणमुह्य

दी॰ टी॰
द्वा॰ स॰
४२